# काशिकावृत्तेः तृतीयाध्ययस्थं लकारसूत्राणांम् अध्ययम्

## तिरुपतिराष्ट्रियसंस्कतविद्यापीठस्य विशिष्टाचार्यः (एम्.फिल्.,संस्कृतम्)


मार्गदर्शकः अनुसन्धाता

डाँ.यशस्वी गोविन्द सोरेन

व्याकरणविभागः

राष्ट्रिसंस्कतविद्यापीठम्

(विश्वविद्यालयानुदानायोगस्य 1956 विधेःतृतीयानुच्छेदेन संस्थापितः विश्वविद्यालयः)

तिरुपतिः



2019

# प्रतिज्ञापत्रम्

**काशिकावृत्तेः तृतीयाध्ययस्थं लकारसूत्राणां अध्ययम्** इति शीर्षकाङ्कितं विषयमधिकृत्य व्याकरणविभागार्चायाणां डाँ.यशस्वी महाभागानां शुभे मार्गनिर्देन लघुशोधप्रबन्धोऽयं मया गोविन्द इति नाम्ना स्वीयप्रयत्नेनापेक्षिताः सकलाः सामग्रीः सङ्कलय्य ग्रथितः, ऐदम्प्राथम्येन तिरुपतिस्थराष्ट्रिसंस्कृतविद्यापीठस्य विशिष्याचार्यः (एम्.फिल्., संस्कृतम्)इत्युपाध्यर्थं च समर्प्यते। अयं लघुशोधप्रबन्धः इतः पूर्वमन्यस्मै कस्मैचिदुपाधिप्राप्तये अत्र विद्यापीठेऽथवान्येषु विश्वविद्यालयेषु नैव समर्पित इति च प्रतिजाने।

इत्थं

दिनाङ्कः-

गोविन्द सोरेन

अनुसन्धाता

**डाँ. यशस्वी**

**आचार्यः**

**व्याकरणविभागः**

**राष्ट्रियसंस्कृतविद्यापीठम्**

**तिरुपतिः**

प्रमाणपत्रम्

सप्रमोदं मार्गदर्शकत्वेन प्रमाणयामि यत् गोविन्द इत्यभिधः अनुसन्धाता निजेन परिश्रमेण सर्वां सामग्रीं सङ्कलय्य **काशिकावृत्तेः तृतीयाध्ययस्थं लकारसूत्राणां अध्ययम्** इति शीर्षकाङ्कतं यथानुसन्धानप्रविधि ग्रथितं समर्पणयोग्यं लघुशोधप्रबन्धं तिरुपतिस्थसंस्कृतविद्यापीठस्य मानितविश्वविद्यालयस्य विशिष्टाचार्यः(एम्.फिल्., संस्कृतम्)इत्युपाधये समर्पयतीति।

दिनाङ्कः-

डाँ. यशस्वी
मार्गनिर्देशकः

# कृतज्ञतानिवेदनम्

सर्वसत्यविद्याकरस्य परमात्मनः निस्सीमकृपया 'काशिकावृत्तेः तृतीयाध्ययस्थ लकारसूत्राणां अध्ययमनम्' इति शीर्षकाङ्तिः लघुशोधप्रबन्धः विर्विघ्नं पर्यपूर्यत।

याभ्याम् आन्मनः अद्य यावत् सुष्टु पालितः,सुसंकारप्रदानेन चाहं गुरुणामनुग्रहपात्रीकृतः,तौ पूजनीयपितरौ सश्रद्धं वन्दे।

यैर्मया सिखितः लघुशोधप्रबन्धः पदशोऽक्षरशश्च श्रुतः, तत्रविद्यमाना दोषाश्च सहेतुकं साकल्येनापाकृताः, अनेनैव च व्याजेन व्याकरणशास्त्रीयसिद्धन्तामन् ये मां सप्रेम बोधतवन्तः, तान् व्याकरणाध्यनाध्यापनायोत्सर्गीक्रियमाणकायान् गुरूभक्तान् छात्रवत्सलान् आचार्यान् **यशस्वी** सश्रद्धं सविनयं च प्रणमामि। तेषां शुभप्रदं मार्गनिर्दशकत्वं प्राप्यैवाहम् अत्यन्तनमुत्साहेन एतद्विषयकशोधप्रबधलेखने समर्थोऽअभूवम् ।

शोधप्रबन्धलेखनस्य सूक्ष्मं प्राथमिकं च ज्ञानं दत्तवद्भ्यः, अनुसन्धानविभागे आचार्यपदवीम् अलङ्कुर्वद्भ्यः **सि.हेच्. पि. सत्यनारायणमहाभागेभ्यः**कृतज्ञतां विनिवेदयामि।

शोधप्रबन्धेन समाजस्य कश्याचित् समस्यास्याः परिष्कारः भवतदिति भावः तरध्यापनकाले मयि निक्षिप्तः।

अस्य लघुप्रबन्धस्य लेखने ये ये ग्रन्थाः मम सहायभूताः, तेषां ग्रन्थानां रचयितृनुद्दिश्य स्वीयां कृतज्ञतां विनिदयामि। अनुसन्धानविभागाध्यक्षेभ्यः **डॉ.कोराडसूर्यनाराणमहोदयेभ्यः** धन्यवादान् विनिवेदयामि ,यैरस्माकं क्लेशं विज्ञाय शोधप्रबन्धसमर्पणस्य पुर्वप्रदत्ता अन्तिमा तिथिग्रे सारिता।

अस्य विद्यपीठस्य कुलपतिभ्यः आचार्य भि मुरलिध शर्मामहोदयभ्यः,कुलसचिवेभ्यः आचार्य जि.र .कृष्णमूर्तिमहोदयभ्यः,शौक्षिकसङ्कायप्रमुखेभ्यः र.सदाशिरमूर्तिमहोदयभ्यः कतज्ञतां विनिवेदयामि ,यैरस्मिन् विद्यापीठस्य शोधकार्यस्यावसरः प्रदत्तः।

परिक्षानियन्त्रकेभ्यः **के.गणपति भट्टमहोयेभ्यः**,विद्यापीठयग्रन्थालयाध्यक्षेभ्यः **डा.जि.गोपालरेड्डिमहदयेभ्यः,** तत्रस्थेभ्यः इतरपदाधिकारिभ्यः कर्मचारिभ्यश्च धन्यवादान् वितरामि। रात्रिन्दिवम् अत्यन्तंश्रमेण निष्ठया च शोधप्रबन्धममुं उट्टङ्कितवते **डॉ.सोमनाथमहोदयेभ्यः** धन्यवादान् वितरामि ।

सन्दर्भेऽस्मिन् इतरविषयेषु मम सहकारं कृतवते ज्येष्ठाय शोधच्छात्राय सूर्यनारायणमहोदयाय, सुहृद्वराय दत्तात्रेयाय च धन्यवादान् विज्ञापयामि।

इत्थं

विद्वज्जनविधेयः

गोविन्द सोरेन

# संकेतपदसूची

1. अष्टा.- अष्टाध्यायी
2. वै. सि. कौ.-वैयाकरणसिदान्तकौमुदी
3. काशि. –काशिका वृत्तिः
4. म.भा.-महाभाष्यम्
5. वा. क.-वाक्यपदीयम्
6. ल. श. –लघुशब्देन्दुशेषरम्
7. सं. व्य. –संस्कृतव्याकरण शास्त्र का इतिहास

8. चा. व्या.- चान्द्रव्याकरणम्
9. पदम – काशिकपदमञ्जरी टीका
10. न्यास.-काशिकावृत्ति की टीका
11. परि.-परिभाषा
12. पृ-पृष्ट
13. प्र- प्रथम
14. प्रौढ-प्रौढमनोरमा
15. भा.-भाषावृत्तिः

# विषयानुक्रमणिका

पृष्टसंख्या


**उपक्रमः** **1-9**

**प्रथमोऽध्यायः- वर्तमानः लकाराः-** **1-17**

**द्वितीयोऽध्यायः- भूतकालो लकाराः** **18-31**

**तृतीयोऽध्यायः- भविष्यत लकाराः** **32-72**

| | |
|---|---|
| **चतुर्थोऽध्यायः-अवशिष्टांश लकाराः** | **77-90** |
| **उपसंहारः** | **91-93** |
| **परिशीलितग्रन्थसूची** | **94-100** |


# काशिकावृत्तेः तृतीयाध्यायस्थलकारसूत्राणाम् अध्ययनम्

## भूमिका

### 1.सूत्रकारः पाणिनिः-

संस्कृत जगति अनेकेषु व्याकरणेषु पाणिनिः श्रेष्ठः भवति।अष्ठाध्याय्याः रचयिता रुपेण तस्य नामैव प्रसिद्धतमम्।अस्य पिर्तनाम "पणिन्नः"इति "काशकृत्स्नधातुव्याख्यानम्" इति ग्रन्थानुसारेण ज्ञायते।महाभाष्यानुसारम् अस्य मातुर्नाम दाक्षि इति "**सर्वेसर्वपदादेशा दाक्षिपुत्रस्य पाणिनेः**"इति वचनमेव प्रमाणम्.।व्याडिः अस्य मातुलः तथा छन्दःसूत्रकर्त्ता पिङ्गलाचार्यश्चासित्।वर्धमामः गणरत्नमहोदधौ इत्थं ब्रूते पाणिनेः अभिजनविषये शलातुरो नाम ग्रामः भवति।शालतुरीयः सोऽभिजनोऽस्यास्तीति,तत्र भवान् पाणिन्निः इति।लाहौर इति नगरमेव नाम्ना सम्प्रति प्रसिद्धं वर्तते। पाणिनीव्याकरणस्य प्रत्येकपदस्य व्यर्थः न दृश्यते । तदर्थं पतञ्जलि मनिना स्पष्टं कृतम्**- प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महता प्रयत्नेन प्रणयति स्म । तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्, किं पुररियता सूत्रेण(माहाभाष्यम्.1-1-1)।**

### 2.पाणिनेः कालः

पाणिनेः कालविषये बहुकालादारभ्य भारतीयपाश्चत्यविद्वत्सु नैकमत्यं प्रतीयते ।क्रिस्तोः पूर्व 24 चतुरविंशतम शतकादारभ्य क्रिस्तोः पूर्वं तृतीयशतकपर्यन्तं पाणिनेः कालः व्यापृतः इति विविधग्रन्थभिः ज्ञायते । तथाहि

पं.सत्यव्रतसाश्रमी- 2400 क्री. पूर्वम्

राजवाडे - 900-800 क्री.पूर्वम्

बेल्वेल्करः- 700-600 क्री. पूर्वम्

भण्डारकरः- 7000क्री. पूर्वम्

उपाध्ययायः- 500 क्री.पूर्वम्

मेकडोनलः- 500क्री.पूर्वम्

मेक्ससुल्लर्- 350 क्री.पूर्वम्

कीथ- 300 क्री. पूर्वम्

श्रीमान् लोकमणिदाहाल् महोदयः[1]कथासरित्सागरमाश्रित्य पाणिनिः नन्दसमकालिकः इति मन्यमानः विष्णुपुराण-श्रीमद्भगवतादिषु ग्रन्थेषु नन्दभिषेकमाकलय्य पाणिनिं विक्रमार्कात् द्विसहस्रवर्षपूर्वभवं मनुते। एवं स्थिते **पण्डितयुथिष्ठरमीमांसमहोदः**[2]अष्टाधाय्यां विद्यमानैः आन्तारिकप्रमाणैः, लौकिकवैदिकसाहित्ये विद्यमानबहिरङ्गप्रमाणैश्च भारतीयपाश्यात्यानां मतानि

## 3.अष्टाध्यायी

“**अष्टाध्यायी**” इति शब्दस्य समासः भवति “अष्टानामध्यायानां समाहाकरः” इति पाणिनीयग्रन्थे प्रतिपादितम्।तथाहि – “अष्टन् आम् अध्याय आम्” इत्यवस्थायां **तद्धितार्थोत्तरपदसमाहारे च**[3] इति सूत्रेण व्दिगुसमासे,विभक्तिलुकि, **नलोपः प्रातिपदिकान्तस्य**[4] इति नकारलोपे अष्टअध्याय”इति स्थिते सवर्णदीर्घे “अकारान्तोत्तरपदो व्दिगुः स्त्रियां भाष्यते” इति वार्तिकेन स्त्रित्वे **द्विगोः**[5] इति सूत्रेण ङपि **यस्येति च**[6] इति अकारलोपे **द्विगुरेकवचनम्**[7] इति सूत्रेण एकवद्भावे च अष्टाध्यायी इति शब्दो निष्पद्यते।

### 4.काशिकावृत्तेः आवश्यकता

अष्टाध्यायाः सूत्राणां क्रमविना अर्थः स्पष्टता न जायते।काशिकावृत्तिः अष्टाध्यायाः प्रकरणानुसारी व्याख्यानग्रन्थः भवति।अतेव काशिकायाः ज्ञानं विना पाणिनिव्याकरणस्य मूलतत्व ज्ञानं सम्भवः न भवति। अष्टाध्यायीक्रमानुसारेणेव व्याकरणस्याध्ययनं अतिवसरल तथा अधिकः लाभदायक वुद्धिस्फुरणं च भवति। कौमुदीक्रिम अध्ययनं निमित्तं काशिकायाः आवश्यता भवति।

### 5.काशिकावृत्तिः

[1] संस्कृतव्याकरणशास्त्रेतिहासः,पृ-60
[2] व्याकरणशास्त्र का इतिहास,प्र.भा.,पृ-205-211
[3] अष्टा 2.9.50
[4]अष्टा 8.2.7
[5] अष्टा 4.9.29
[6] अष्टा 6.4.148
[7] अष्टा 2.4.9

सम्प्रति उपलभ्यामासु पाणिनीयव्याकरणवृत्तिषु अत्यन्तं प्राचीना महत्त्वपूर्णा च वृत्तिरेक "काशिका" इति नाम्ना लोके प्राचुर्यमलभत । सेयं काशिकावृत्तिः विद्वत्प्रवरौ जयादित्यवामनौ व्यररचताम् । पाणिनीयव्याकरणग्रन्थेषु महाभाष्यवाक्यपदीययोः अनन्तरं काशिकावृत्तिरेव प्राचीनतमा, महत्त्वपूर्णा चेति पण्डित युधिष्ठरमीमांसकानामभिमतम्[8] ।

## 6.काशिकावृत्तेः कर्ता

परनत्वेतादृशमहत्त्वपूर्णग्रन्थस्य कर्ता, कालः, धर्मः इत्यादीनां विषये विद्वत्सु नैकमत्यं दृश्यते । पण्डिताः केचन काशिकावृत्ति जयादित्य-वामनयोः सम्मिलितकृतिरिति मन्यन्ते ।अन्ये वृत्तिरियं असंपूर्णयोः द्वयोः वृत्त्योः सम्मेलनमिति अवोचन् । जयादित्यवामनभ्यां पृथक् पृथक् वृत्तिः रचिता, कालान्तरे तयोः सम्मिश्रणमङ्गीचक्रुः । एवं काशिकावृत्तेः कर्तारं केचन जैन इति, अपरे बौद्ध इत्यभिवर्णयन्ति । अतः अत्र काशिकावृत्तिकारस्य विषये सन्दर्भेऽस्मिन् किञ्चिदत्र प्रस्तूयते ।

काशिकावृत्तेः लेखकस्य चिन्तनसमये विद्यमानप्रामाणनां अन्तरङ्ग- बहिरङगप्रमाणानि इति विभागद्वयं चकार डाँ रघुवीर वेदालङ्गकार महोदयः"[9]1

i. **अन्तरङ्गप्रमाणनि-**

काशिकावृत्तावेव लखकस्य विषये प्राप्तानि प्रामाणानि अन्तरघङ्गाणि इति वक्तुं शक्यते ।

ii. **वहिरङगप्रमाणिनि-**

काशिकावृत्तेः कर्तृत्वविषये शोदवकृर्तृभिः प्रतिपादितानि वहिरङ्गानि ।

iii. **अन्तरङ्गप्रमाणानि-**

यथा कादम्वरी द्वाभ्यां लेखकाभ्यां विरचिता सति सर्वत्र एकविधा शैला अनुसृता तथैव काशिकावृत्तावपि आदितः अन्तपर्यन्तम् एकविधा शैली दृष्टिपथमायाति । काशिकावृत्तेरध्ययने यः कोऽपि अध्येता वृत्तिरियं द्वाभां विरिचेति ऊहितुं न सक्नोति । तथापि सूक्ष्मतया परिशीलनेन विभिन्नकर्तृकत्वमुपपादयितुं शक्यते । तद्यथा-

1. "कृत्यतुल्याख्या अजात्या"(2.1.68) इति सूत्रस्य काशिकावृत्तौ[10] "तुत्याख्या" शब्दस्य चत्वारि उदाबहरणानि दृश्यन्ते । परन्तु "तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः"(6.2.2) इति सूत्रस्य काशिकावृत्तौ[11] "तुल्यार्थ" शब्दस्य नव उगदाहरणानि प्रस्तुतानि येषु चत्वारि "कृत्यतुल्याख्या" (2.6.68) इति सूत्रस्थान्येव । एवञ्च काशिकावृत्तौ "तत्पुरुषे तुल्यार्थ..."(6.2.2) इति सूत्रे

8. संस्कृत व्याकरणशास्त्र का इतिहास,प्र.भाग,पृ.501
9 काशिका का समालोचनात्मक अध्ययन.पृ.22
10 काशिका,द्वि.भागः,पृ.89
11 तत्रैव,पं.भागः,पृ.5

"एतेकृत्यतुल्याख्या अजात्येति कर्मधारयः" इत्युत्वा "कृत्यतुल्याख्या..." (2.1.68) इति सूत्रं सस्मार। अतः अनेन स्पष्टमं ज्ञायते यत् सूत्रद्वये वृत्तिकारः भिन्न एवेति।

2. "परिप्रत्युपा वर्ज्यमानाहोरात्रावयवेषु" (6.2.33) इति सूत्रस्थकाशिकावृत्तौ[12]

## 7.जयादित्यवामनयोः ग्रन्थविभागः

1) पं.बालशास्त्री महोयदयस्य मतमनुसृत्य आद्याः चत्वारः अध्यायाःजयादित्यविरचिता,अन्तिमाश्चत्वारः अध्यायाः वामनविरचिताः।
2) प्रौढमनोरमायाः शब्दरत्नव्याख्याकारः हारिदीक्षितः[13] इत्थमभिप्रैति-'प्रथमद्वितीयपञ्चमषष्ठाः जयादित्यकृतवृत्तयः इतरे वामनकृतवृत्तय इत्यभियुक्ताः'इति।
3) पं युधिष्ठिरमीमांसकः[14] स्वग्रन्थे आद्याः पञ्चाध्यायाः जयादित्यविरचिताः अन्तिमास्त्रयः वामनकृताः इति अनेकैः प्रमाणैः निरुपयामास।

काशिकावृत्तेः नामन्तराणि

काशिकावृत्तेः 'एकवृत्तिः'इति नामान्तरमपि वर्तत इति भाषावृत्तौ[15]पुरुषोत्तमवेदस्य वचनाज्ज्ञायते। भाषावृत्तेः व्याख्याकारः सृष्टिधराचार्यस्तु[16] 'एकवृत्तिः'इति शब्दप्रयोगं युक्तियुक्तं समर्थति। तद्यथा – 'एकवृत्तौ साधारणवृत्तौ वैदिके लौकिके च विवरणे इत्यर्थः। एकवृत्ताविति काशिकायां वृत्तावित्यर्थः'इति।

## काशिकावृत्तेः वैशिष्ट्यम्

अष्टाध्यायाः वृत्तिग्रन्थेषु मूर्धन्यस्थानं भजते इयं काशिकावत्तिः। 'काशिका'इति नामकरणस्य अन्वर्थसज्ञां प्रतिपादयति सृष्टिधरार्चायः[17]। यथा 'काशयति प्रकाशयति सूत्रार्थमिति काशिका 'इति। ग्रन्थकर्ता स्यवं ग्रन्थादौ प्रोयजनमित्थं प्रादशर्यत्[18]-

वृत्तौ भाष्ये तथा धातुनामपारायणादिषु।
विप्रकीर्णस्य तन्त्रस्य क्रियते सारसंग्रहः॥1॥
इष्ट्युपसंख्यानवती शुद्धगणा विवृतगूढसूत्रार्था।
व्युत्पन्नरुपसिद्धिवृत्तिरियं कासिका नाम॥2॥
व्याकरणस्य शरीरं परिनिष्ठितशास्त्रकार्यमेतावत्।
शिष्टः परकरबन्धः क्रियतेऽस्य ग्रन्थकारेण॥3॥

---

[12] तत्रैव,पं.भागः
[13] प्रौढमनोरमा, शब्दरत्नसहिताः,प्र.भागः, पृ, 504
[14] संस्कृत व्याकरणशास्त्र का इतिहास,प्र. भाग, पृ.502-03
[15] भाषावृत्तिः,पृ.4
[16] तत्रैव, पादटिप्पण्याम्,पृ.4
[17] भाषावृत्यर्थविवृतिः,8.4.68
[18] काशिका, प्र भागः, पृ.3.

प्रथमकारिकायाः अयमाशयः

काशिकायाः पूर्वं लिखिताः अनेकाः वृत्तयः भाष्यात् पूर्ववर्तिन्यः आसन् । अतः ताः वृत्तयःअसंपूर्णाः । प्राचीनाः वृत्तयः,भाष्यम्,धातुपारायणम् ,नामपारयणम्,शिक्षा, उणादिसूत्राणि इत्यादिग्रन्थानां सारसङ्गहः क्रियते इति तदर्थः । काशिकायाः एषा विशेषता पूर्ववर्तिवृत्तीनीमपेक्षया वैशिष्ट्यं प्रतिपादयति एवं परवर्तिवृत्तीनामपेक्षया उत्कृष्टत्वं च साधयतीति रघुवीरं वेदालङ्कार महोदयस्याशयः[19]।

## 8.काशिकायाः आववश्यकता

पूर्वोक्भाष्यादिसारभता काशिका पुनः इष्ट्युपसंख्यानत्वम्, शुद्धगणत्वम्,विवृतगूढार्थत्व्,व्यत्पन्नरुपसिद्धित्वमित्यादिलक्षणयुक्ता। तद्यथा-

इष्ट्युपसंख्यानवती- इष्टिश्च उपसंख्यानं च इष्ट्युपसंख्याने ,इष्ट्युपसंख्यानेऽस्यां स्तः इति इष्ट्युसंख्यानवती । तत्र ‘मृजेरजादौ विभाषा वृद्धिरष्यते’इत्यादीनि इच्छाप्रदर्शकवाक्यानि इष्टयः। उपसंख्यानम् –वार्त्तिकम् ।

शुद्धगुणा- काशिकाकारः स्वसमये विद्यमानं गणपाठं संशोध्य स्वग्रन्थे प्रामाणिकं गणपाठं निर्ममे । सन्दर्भेऽस्मन् पदमञ्चरीकारः वदति [20]- ‘वृत्तन्तरेषु गणपाठ एव नास्ति’ इति ।गणपाठं संशोधयता च प्रोक्तं ‘शुद्धगणा ’इति ।

विवृतगूढसूत्रार्थ-काशिकाकारः सूत्राणां गूढार्थं संक्षेपेण अत्यन्तमिपुणतया वर्णयामास ।गूढार्थ स्पष्टीकर्तुं स्थाने स्थाने प्राचीनाचार्याणां वृत्तमप्युद्धरति ।

व्यत्पन्नरुपसिद्धिः- ‘व्यत्पन्नानां शब्दरुपाणां यस्यां सा’इति हरदत्तः[21]काशिकाग्रन्थः सूत्रार्थविवरणेन क्लिष्टरुपाणि साधयति ।

## 9.अष्टाध्याय्याः तृतीयाध्यायस्य महत्त्वम्

अष्टाध्याय्याः तृतीयाध्यायो धातोर्विहितानां प्रत्ययानां प्रकरणं विद्यते । अत्र प्रथमं भूवादयो धातव इत्यनेन येषां धातूनां निर्देशो विद्यते,तादृशेभ्योऽकृतिमधातुभ्यः सनादिप्रत्यययोगात् सन्नन्तादिधातुनिर्माणप्रविधिर्निदिश्यते । अतोत्र प्रथमं सर्वं शब्दमूलभूतानां कृत्रिममाणामपि धातूनां बुभष् प्रभृतीनां स्वरुपव्यवस्थापनं विद्यते , येन उभयविधादपि तस्मात्कृदादयः प्रत्यया विधीयेरन् । धातुस्वरुपव्यवस्थापनात्परं विकरणानां प्रकरणमारब्धम्, तेषां धातोरव्यवहितपरत्वेन दृश्यमानत्वाद् कृदाद्यपेक्षया अन्तङ्गत्वाच्च । विकरणानामपि सार्वधातुकार्धधातुकभेदात् द्विधा विभागे विद्यते , तत्रार्धधातुकानां स्यसिजादीनां शबादिसार्वधातुकापेक्षयान्तरङ्गतास्ति अतस्तेषां पूर्वं विधानमवलोक्यते । ततः परं कर्मकर्तृभावस्य प्रसङ्गो यक् चिणआदिसम्बन्धादेवोपदिष्टः, किञ्च तत्र कर्तरि कृदित्यतः कर्तृपदं सुतरामुपलभ्यते इति लाघवानुरोधेनापि तस्य समावेशो विद्यते ।

---

[19] काशिका, ज्योतष्मती- व्याख्यासहिता,प्र.भागः, भूमिकायाम् पृ.2
[20] काशिका पदमञ्जरी सहिता, प्र.भागः,पृ.5
[21] तत्रैव, पृ 6

## 10.लकाराणां परिचयः

व्याकरणतन्त्रे धातुरेव मूलप्रकृतिः स्वीक्रियते। दधाति विविधशब्दरुपाणीति धातिरिति वैयाकरण निकाये प्रसिद्धम् ।**लर्वाणि नामानि आख्यातजानि** इति शाकटायन मतं वयं यास्कीये निरुक्ते पश्यामः । आचार्येण चन्द्रगोमिता धाञ् धातोः ओणादिकेन तुन् प्रत्यय प्रयोगेण धातुशब्दो व्युत्पादितः । इदं स्पष्टमेव यद् क्यमेतेभ्यो धातिभ्यः कृत् तिङ् प्रत्ययान् विधाय नानाशब्दरुपीणि निष्पादयामः।

तिङ् इति यः प्रत्ययप्रयोगः अस्माभिः क्रियते ,स तु प्रत्याहार सिद्ध एव । **तिप्-तस्झि..महिङ्** इति अष्टादश प्रत्ययादेः **ति** इति गृहित्वा ,अन्तस्य च महिङ् प्रत्ययस्य इत्संज्ञकं ङकारमादय **आदिरिता समध्य**[22] इति सूत्रेण प्रत्याहारोऽयं विधीयते। तिप्-तस्झि-इत्यत्रैव त प्रभृति आत्मनेपद प्रत्ययानां ङकारयावत् पाठो वर्तते। तेन तङ् प्रत्यहारो निर्मीयते, अपि च, आन–विशिष्टाः प्रत्ययाः आत्मने पदाः सन्ति। तस्मादेव आत्मने पद-प्रत्ययाः तङाना आत्मने पदिनो धातवश्च तङानिनः उच्यन्ते। एवमेव परस्मैपदिनो धातवः अतङाना उच्यन्ते। उभयपदिनां धातूनां कृते विभाषिता इति व्यवहारः चान्द्र- तन्ते दृश्यते। कर्म इत्यस्य कृते आप्य-व्याप्य-शब्दौ प्रयुक्तौ।अन्ये ये शब्दाः प्रयुक्ताः , तेषां विवरममनुपदमेव तत्ततस्थेलेषु प्रस्तोष्यते।

चान्द्र-व्याकरणेऽपि पाणिनी-व्याकरणमिव दश-गण अङ्गीकृताः । तद्यथा- 1.भूवीदिगणः,2.अदादिगणः,3.हवादिगणः(जुहोत्यादिगमः),4.दिवीदिगणः,5.स्वादिगणः,6.दुदादिगमः,7.रुधादिगणः,8. तनादिगणः,9.क्र्यादिगणः,10.चुरादिगणश्चेति।

चान्द्र-व्याकरणे वर्तमानादिकालेषु, विध्याद्यर्थेषु च ये तिबादयः प्रत्ययाः प्रयुज्यन्ते,ते लः एव स्थाने भवन्ति ,तस्मात् तेषां कृतेऽपि लकार इति प्रयोगो विधीयते। अस्मिन् व्याकरणे वैदिकप्रकरणस्य नोपलभ्यते, तस्माद् छन्दोमात्रगोचरो लेट् अत्र न प्रप्यते। एवं सत्यपि लिङ्- लकारस्य द्विधा भेदेन लकारा एव परिगणयितुं शक्यन्ते।

एते लकाराः सन्ति- 1.लट्, 2. लिट्, 3. लुट्, 4.लृट्, 5.लोट्, 6. लङ्, 7.लिङ् (विधिलिङ्), 8.लिङ्(आशीर्लिङ्), 9 लुङ्, 10.लृङ् चेति।

1. **लट् लकारः**

**वर्तमाने लट्**[23] –वर्तमानक्रियावृत्तेर्धातोर्लड् भवति। अटौ इतौ। भू ल् इति स्थिते **लः तिप-तस्-झि-सिप्-थस्-थ-मिप्-वस्-मस्-त-आतां-झ-थास्-आथां-ध्वम्-इड्-वहि-महिङ्**-ल् इत्यस्य स्थाने अतङानेभ्यः धातुभ्यः पूर्वे तिबादयः, तङानिभ्यो धातुभ्यः अपरे तादयः नव प्रत्ययाःविधीयन्ते।

**एक-द्वि-बहुषु** इत्यनेन सूत्रेण प्रथमपुरुषैकवचने तिपि, **कर्तरि शप्** इत्यनेन शपि अनुबन्धलोपे पूर्वोक्तानुसारेण **इकःअदेङ् क्रियार्थायाः** अदेङि, अवादेशे च कृते भवति इति रुपं भवति।

[22] चा.व्या.1.1.1

[23] चा.व्या.1.2.82

## 2. लिट् लकारः

**परोक्ष लिट्**[24] भूतानद्यतनपरेक्षार्थवृत्तेर्धातोर्लिड् भवति। अक्ष्णःपरमिति परोक्षम्। लिटि प्रथम-पुरुषैकवचने तिपि- **अतङां-णल्-अतुस्-उस्-थल्-अथुस्-अ-णल्-व-मा** [25]तिबादि नव प्रत्ययानां स्थाने क्रमशःणलादय आदेशाः भवति। तेन तिपः स्थाने णलि,अनुबन्ध-लोपे भू अ इति स्थिते **भूवः वुक् लुङ्-लिटोः**[26] इत्यनेन वुगागमे अनिबन्ध लोपे **भूव् अ** इति जाते **चङ्-लिटोः**[27] चङि लिटि च धातोः आद्यस्य एकाचः द्वे स्तः। **भूव् भूव् अ** इति स्थिते **हलःअनादेः**[28]इति सूत्रेण आदि भिन्नेषु हल्सु लुप्तेषु **भू भूव् अ** इति जाते **ह्रस्व** [29]इति ऊकारस्य ह्वस्वे कृते **उः अत्** इति सूत्रेण उकारस्य अत्त्वे,**झषःजस्**[30] इत्यने

## 3. लुट् लकारः

**अनद्यतने लुट्**[31] भविष्यत्यनद्यतनेऽर्थे लुट् भवति। अनद्यतने यथा श्वो **भविता।** लुट् आद्यानां **डा-रौ-रस**[32] आद्यानां तिप-तस्-झि इत्येतेषां क्रमाद् डा रौ रस् इत्येते भवन्ति।लुटि प्रथम-पुरुषैकवचने भू डा (अनुवन्ध लोपे आ ) ति जाते **स्य-तासौ लृ-लुटौ** लृ इत्यनेन लृटः च ग्रहणम्। लृटि लृङि च परे धातोः स्य लुटि च तास् चेति भवतः। एवं तासि इडागमे च कृते – **भू इतास् आ** । तास् इत्यस्य सकारलोपे, धातोः अदेङि **भो इता आ**। अवादेशे ,वर्णसम्मेलने **भविता** इति रुपं सिद्धम्।

## 4. लृट् लकरः

**भविष्यति लृट्**[33] भविष्यदर्थवृत्तेधातोर्लृड् भवति। लृटि प्रथम पुरुषैकवचने तिपि,स्य-तासौ लृटौ इत्यनेन स्यप्रत्यये **भू स्य ति** इति जाते, इडागमे ,**कोश्चादेशसनादिशासिवसिघसां स**[34] इति सूत्रेण षत्वे **भू इष्य ति** इति

---

[24] चा.व्या 1.2.81
[25] चा.व्या.1.4.11
[26] चा.व्या.5.3.92
[27] चा.व्या 5.1.2
[28] चा.व्या6.2.112
[29] चा.व्या6.2.119
[30] चा.व्या 6.2.115
[31] चा.व्या 1.3.3
[32] चा.व्या 1.4.18
[33] ची.व्या.1.3.2
[34] चा.व्या.6.4.46

जाते,अदेङि (आन्तरतम्येन एकारे कृते)**भो इष्य ति** इति जाते,अवादेशे ,वर्णसम्मेलने च कृते **भविष्यति** इति रुपम् ।

5. **लोट् लकारः**

**लोट्**[35] विध्यदिषु अर्थेषु लोड् भवति । (विधि-सम्प्रश्न-प्रार्थनेषु इति पूर्व सूत्रमनुवर्तते ।) **भू लोटि** प्रथमपुरषैकवचने तिपि,शपि,अदेङि,अवादेशे भवति इति जाते **लोट एः उः**[36] इत्यनेन सूत्रेण इकारस्य उत्वे जाते **भवतु** इति रुपम् ।

6. **लङ् लकार**

**अनद्यतने लङ्**[37] अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् भवति । **लुङ्-लङ्-लृङ्क्षु अट् –अमाङ्-योगे** [38] लुङि, लङि, लृङि च धातोः इडागमो भवति ,न तु माङ् योगे ।

लुङि प्रथमपुरुषैकवचने अडागमे, तिपि,शपि **इकःक्रियार्थे** इत्यादि सूत्रेण अदेङि,अवादेसे **अभव् अ ति** इति जाते **इतःअतङि**[39] अतङि ङितां लकारणामिकारस्य लोपो भवति । इत्थम् इकार लोपे **अभवत्** इति रुपं भवति ।

7. **विधिलिङ् लकारः**

**विधि-सम्प्रश्न-प्रार्थनेषु**[40] चन्द्राचार्यानुसारेण विधिरप्राप्तनियोगः । स दृष्टर्थोऽपि चादृष्टार्थोऽपि ।प्रत्याख्याने सप्रत्यवायःनिष्प्रत्यवायो वा, सत्कारपूर्वको वा न्यक्कारपूर्वको वा । सर्वोऽप्यप्राप्तनियोगो विधिरेव । सम्प्रश्नः संप्रधारण । सम्प्रार्थनं याचनं, इष्टार्थाशंसनं च । एषु सर्वत्र लिङ् ।

लिङि प्रथमपुरुषैकवचने तिपि,शपि **भू अ ति** । ति इतियस्य इतः अतङि इति सूत्रेण इकार लोपे अदेङि,अवादेशे **भव त् ति** जाते **यासुट् तङः कित्** [41] अतङः लिङः यासुडागमो भवति, स च कित् । **ङित् अनाशिषि**[42] इत्यनेन सूत्रेण अत्र ङित् । अनुबन्ध लोपे **भव यास् त् ।** एवं सति **अत इय्**[43] इत्यनेन अकारात् परस्य यासुटः इय आदेशे **भव इय् त् । सुट् तथोः**[44] इत्यनेन लिङि तकार परे सुटि **सो लोपःअनन्त्यस्य**[45] इत्यनेन

[35] चा.व्या.1.3.122
[36] चा.व्या.1.4.20
[37] चा.व्या.1.2.77
[38] चा.व्या.5.3.82
[39] चा.व्या.1.4.30
[40] चा.व्या.1.3.121
[41] चा.व्या.1.4.33
[42] चा.व्या.1.4.34
[43] चा.व्या.1.4.35
[44] चा.व्या.1.4.39
[45] चा.व्या.1.4.36

अनाशिषि सुडित्यस्य सकारस्य लोपे **भव इयत्** । एवं सति **यग्रःवलि लोपः**[46] इत्यनेन तकारे (वलि) यकारस्य लोपः । **भव इ** इत्यत्र अदेङि एकारे वर्णलम्मेलने **भवेत्** इति सिद्धम् ।

## 8. आशीर्लिङ् लकार

अत्र शबभावः, कित्त्वे च अदेङभावो विशेषः । प्रथमपुरुषैकवचने तिपि, इकार लोपे, यासुडीगमे **भू यास् त् । स्कोः संयोगाद्योः अन्ते च**[47] इत्यनेन सूत्रेण अन्त्ये तकारे सति सकार लोपे **भूयात्** इति रुपं भवति ।

## 9. लुङ् लकारः

**लुङ्**[48] भूते इत्यनुवर्तते । भूतार्थवृत्तेर्धातोर्लुङ् भवति । **लुङ्** इत्यनेन सूत्रेण भूतसामान्ये लुङ् । प्रथमपुरुषैकवचने भूधातोः **लुङ् लङ्-लृङक्षु अट् अमाङ-योगे** इति सूत्रेण अडागमे,तिपि, **इतः इतङि** इत्यनेन इकाकरस्य लोपेल **अ भू त्** इति जाते जाते **लुङि सिच्** [49] इत्यमनेन सूत्रेण लुङि सिच् ।इचावितौ। **अ भू स् त्** इति जाते-[50]**दा-धा-गाति- स्था-भू-पोऽतङि लुक्** इति सूत्रेण दादि –धातनां सिचो लुक्। तेन सिचि लुकि, "इकः अधेङ् क्रियार्थायाः"इत्यनेनअदेङि प्राप्ते –**भू-सुवःअद्वे तिङि**[51] इत्यनेन भू षूञ् चेति धात्वोः लुङि तिङि अदेङ् न भवति द्वित्व भिन्न-दशायाम् । एवम् अदेङ्-निषेधे सति –अभूत् ।

## 10.लृङ् लकारः

**लिङि अतिपतौ लृङ्**[52] असिद्धिरेव अतिपत्तिः । हेतुहेतुमद्भावादि लिङ् निमित्तम् । तत्र क्रियायाः असिद्धिःगम्यते चेते, लुङ् भवति । यथा **सुवृष्टिश्चेद् अभविष्यत्, सुभिक्षमभविष्यत् ।** लुङि अडागमे ,तिपि, इकारलोपे **स्य-तासौ-लृ-लुटौ** इत्यनेन स्य प्रत्यये- **अ भू स्स त् ।** स्य इत्यस्य इडागमे सकारस्य षकारशेदे **अभू इ ष्य त् ।** भू इत्य अदेङि(ओकारे ), अवादेशे **अभविष्यत्** इति रुपं भवति ।

# प्रथमोऽध्यायः

व्याकरणे शास्त्रे दश लकाराः वर्तन्ते। तान् दशलकारान् बोधसौकर्याय ग्रन्थकर्त्रा टितः ङितश्चेति भेदेन द्विधा विभागः कृतः। तत्र लट् लिट् लुट् लृट् लेट् लोट् इति षट् टितः लकाराः वर्तन्ते। लङ, लिङ्, लुङ लृङ् इति चत्वारो ङितो लकारा वर्तन्ते इति विभागः। टितां लकाराणां अर्थं भूषणसारे अनया कारिकया संगृह्णाति यत्

---

[46] चा.व्या .5.1.63
[47] चा.व्या 6.3.58
[48] चा.व्या. 1.2.76
[49] चा.व्या.1.2 62
[50] चा.व्या.6.2.62
[51] चा.व्या.6.3.29
[52] चा.व्या.1.3.107

**वर्तमाने परोक्षे श्वोभाविन्यर्थे भविष्यति।**
**विध्यादौ प्रेरणादौ च क्रमाज्जेया लडादयः[53]।। इति**

वर्तमाने लट् लकारो भवति।

**वर्तमानकालः**

कलयति आयुः इति विग्रहे कल् संख्याने इति धातोः पचाद्यचि ततः प्रज्ञाद्यण्प्रत्यये कालः इति निष्पन्नः। व्याकरणे लकारव्यवस्थाऽपि कालमन्तरा न सम्भवति, अत: कालस्वीकरणं कर्तव्यमेव। भगवान् भर्तृहरिणापि वाक्यपदीयस्य प्रथमकाण्डे ब्रह्मणः शक्तित्वेन कालस्य चर्चा कृता, किञ्च तैः काललक्षकं कालसमुद्देशनामक प्रकरणमपि विरचितम्। तद्यथा -

**अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः।**
**जन्मादयो विकाराः षड् भावभेदस्य योनयः।।[54]**

किञ्च कालवशादेव षड्विकाराः जायन्ते, येन पदार्थानां भेदः दृश्यते। अत एवोक्तं वर्तते –

**विशिष्टकालसम्बन्धाल्लब्धासु पाकासु शक्तिषु।**
**क्रिया विभज्यते नित्या प्रयोगाख्येन कर्मणा।।**
**उत्पत्तौ स्थितौ चापि विनाशे चापि तद्वताम्।**
**निमित्तकालमेवाहुः विभक्तेनात्मना स्थितम्।।**

भगवान् भाष्यकारोऽपि "कालाः परिमाणिना" इति सूत्रे भाष्ये ब्रूते तथाहि "येन **मूर्तीनामुपचयाश्चापचयाः लक्ष्यन्ते तं कालमाहुः। स एव क्रियायुक्तः सन् रात्रिः दिनमित्याकारकः व्यवहारः प्राप्नोति।** कैयटोऽपि तं भाष्यं व्याचष्टे - **"तरुतृणलताप्रभृतीनां कदाचिदुपचयः कदाचिदपचयः एवंरूपेण यः कृतः सः सर्वोऽपि कालकृत एव"।** यद्यपि व्याकरणमतेऽपि काल: नित्यः विभुः किन्तु औपाधिकभेदेन सः भेदवान् भवति। यथा - वैशेषिकाः कालस्य भेद उपाधिवशाद् स्वीकुर्वन्ति तथैव वैयाकरणा अपि। नागेश: कथयति - "**योगिनां वैशेषिकाणां कालस्वरूपमेव व्याकरणाभिमतम्**"। अत एव भगवान् भर्तृहरिः वदति -

कालाभिः पृथगर्थाभिः प्रविभक्तं स्वभावतः।
केचिद्बुध्यनुसंहारलक्षणं च प्रचक्षते।।

कालश्च त्रिविधः वर्तमानः, भूतः, भविष्यतश्चेति। तत्र कोयं वर्तमानकालो नाम इति पृच्छायां लक्षणद्वयं प्राप्यते। प्रथमं लक्षणम्- **प्रारब्धापरिसमाप्तत्वं वर्तमानत्वम्**। तदेव **आरब्धः अपरिसमाप्तश्च वर्तमानः**" इति

---

[53] श्लो. क्र. 22
[54] श्लो क्र 1.3

काशिकाकारः वदति। अर्थात् पाकक्रिया प्रारब्धा सती, यावत् परिसमाप्ता न भवति तावत् सा क्रिया वर्तमानकालविशिष्टेति बोधव्या। यथा पचति, गच्छति।

द्वितीयं लक्षणं कौण्डभट्टः निर्दिशति " **भूतभविष्यभिन्नत्वं वर्तमानत्वम्**" इति। तत्र **वर्तमानकालध्वंसप्रतियोगित्वं हि भूतत्वं**। घटे ध्वस्ते सति अतीतोऽयं घट इति व्यवहारो जायते, तत्र हि वर्तमानो यो ध्वंस इत्युक्ते इदानीं विद्यमानः घटध्वंसः, तत्प्रतियोगित्वं घटे अस्तीति घटः अतीत इति , भूतकालिक इति वा व्यवहारः। **वर्तमानप्रागभावप्रतियोगित्वं हि भविष्यत्वम्**। एवं भाविनि घटे उत्पत्स्यमाने सति घटो भविष्यतीति व्यवहारो जायते। तत्र वर्तमानो यः प्रागभावः इत्युक्ते घटप्रागभावः तत्प्रतियोगित्वं घटे वर्तते इति घटो भविष्यत्कालिकः इति व्यवहारः। तादृशोभयघटभिन्नो यो घटो वर्तते स वर्तमानः इति व्यवहारः। **वर्तमानकालध्वंसप्रतियोगित्वं हि भूतत्वम्** इति , **वर्तमानप्रागभावप्रतियोगित्वं हि भविष्यत्वम्** इति भूतत्वभविष्यत्वयोः लक्षणम् अज्ञात्वा एतल्लक्षणं ज्ञातुं न शक्यते। तथा च लक्षणे भूतादिज्ञानाधीनं वर्तमानत्वम्, वर्तमानत्वज्ञानाधीनं भूतादिज्ञानमित्यन्योन्याश्रयः। अत पूर्वोक्तमेव लक्षणं स्वीकार्यम्।

वर्तमानकाले विधीयमानलकाराः उच्यन्ते।

## वर्त्तमाने लट् (३-२-१२३)

वर्तमाने इति सप्तम्यन्तं पदम्, लट् प्रथमान्त ं पदम् इति द्विपद ात्मकमिदं सूत्रम्। सूत्रेऽस्मिन् **प्रत्ययः**[55] **परश्च**[56] **आद्युदात्तश्च** [57] **धातोः**[58] इत्येतानि अधिक्रियन्ते।

या क्रिया आरब्धा अस्ति परन्तु समाप्ता नास्ति तस्मिन् वाच्ये लट्लकारो भवति

तथाहि पाकक्रिया नाम चुल्ल्युपरिधारणप्रभृति चुल्ल्यधस्स्थापनपर्यन्तं प्रवर्तते। चुल्ल्युपरिधारणेन प्रारभ्यते, चुल्ल्यधस्स्थापनेन च समाप्यते। तथा च तदन्तरालसमये या क्रिया सा प्रारब्धापरिसमाप्ता क्रिया। तदाश्रयः कालः यो अन्तरालकालः सः वर्तमानकालः इत्युच्यते। एवं च तदानीं पचतीति लट्लकारः प्रयुज्यते।

एवं चानया रीत्यापि यदा पाकक्रिया आरब्धा अर्थात् चुल्ल्युपरिधारणं कृतं, तस्यामवस्थायां पाकक्रियाया नापि ध्वंसोस्ति नापि प्रागभाव इति तत्प्रतियोगित्वं नास्तीति पाकक्रियायामिति भूतभविष्यद्भिन्नत्वरूपवर्तमानकालिकत्वं वर्तते इति भवति तदा लट्प्रयोगः।

लट्" प्रत्ययस्य अर्थः न "वर्तमान" इति । "वर्तमानत्वम्" इति क्रियायाः विशेषणम् अस्ति। तत् द्योतयितुम् "लट्" प्रत्ययस्य प्रयोगः भवति। "लट्" इत्यत्र टकारस्य **हलन्त्यम्** [59]तथा अकारस्य **उपदेशेऽजनुनासिक इत्** [60] इत्यनेन इत्संज्ञा भवति, तयोः **तस्य लोपः** [61] इत्यनेन च लोपः भवति।

---

[55] अ ध्या **३.१.१**

[56] **तत्रैव ३.१.२**

[57] तत्रैव **३.१.३**

[58] तत्रैव **३.१.९१**

वर्तमानकाले धातोः लट् लकारो भवति। यद्यपि लट् लकारो वर्तमानकाले भवति तथापि कदाचित् अन्यस्मिन् लकारेऽपि तस्य विधानं भवति। अतः लट् लकारस्य विस्ताररुपेण प्रयोगः किदृशः स्यात्, अस्य विवरणम् अन्येषु वर्तमानलकारेषु प्रतिपादनं क्रियते।

## २. लट् स्मे (३.२.११८)

लट् इति प्रथमैकवचनान्तं पदम्। स्मे इति सप्तम्येकवचनान्तं पदम्। अत्र **प्रत्ययः** [62] **परश्च** [63] **आद्युदात्तश्च** [64] **धातोः** [65] **भूते** [66] इत्येतानि अधिक्रियन्ते। **अनद्यतने लङ्** [67] इत्यतः अनद्यतने इति , **परोक्षे लिट्** [68] इत्यतः परोक्षे इति च अनुवर्तते।

स्म इत्युपपदे भूतानद्यतने परोक्षार्थे धातोः परः लट् भवति।

प्रयोक्तुरिन्द्रियाऽगोचरत्वं परोक्षत्वमिति लक्षणम्। **अतीतरात्रेरन्त्ययामेन आगमिरात्रेराद्ययामेन सहितो दिवसोऽद्यतन** इति लुङ्सूत्रभाष्ये कैयटे स्थितम्। लिटोऽपवादोऽयम्। यथा **यजति स्म युधिष्ठिरः** इति प्रयोगः। स्म इत्युपपदे न भवति चेद् लिट् लकारो भवति। यथा **इयाज युधिष्ठिरः** इति व्यवहारः।

काशिकावृत्तिः भूतानद्यतनपरोक्षे इति वर्तते। स्मशब्दे उपपदे भूतानद्यतनपरोक्षे लट् प्रत्ययो भवति। लिटो ऽपवादः। नडेन स्म पुराधीयते। ऊर्णया स्म पुराधीयते।

## ३. अपरोक्षे च (३.२.११९)

न परोक्षः इति अपरोक्षः, तस्मिन् अपरोक्षे इति सप्तम्यन्तं पदम्। च इति अव्ययम्। अत्र **प्रत्ययः** [69] **परश्च** [70] **आद्युदात्तश्च** [71] **धातोः** [72] **भूते** [73] इत्येतानि अधिक्रियन्ते। **अनद्यतने लङ्** [74] इत्यतः अनद्यतने इति , **लट् स्मे** [75] इति च अनुवर्तते।

---

59 अ ध्या १.३.३
60 तत्रैव १.३.२
61 तत्रैव १.३.९
62 तत्रैव ३.१.१
63 तत्रैव ३.१.२
64 तत्रैव ३.१.३
65 तत्रैव ३.१.९१
66 तत्रैव ३.२.८४
67 तत्रैव ३.२.१११
68 तत्रैव ३.२.११५
69 अ ध्या ३.१.१
70 तत्रैव ३.१.२
71 तत्रैव ३.१.३
72 तत्रैव ३.१.९१
73 तत्रैव ३.२.८४
74 तत्रैव ३.२.१११

स्म इत्युपपदे भूतानद्यतने अपरोक्षार्थे धातोः परः लट् भवति।

पूर्वेण सूत्रेण परोक्षे लट् विधानादपरोक्षार्थे एवं स्म पिता ब्रवीति इत्यादौ न प्राप्नोति, अतस्तत्रापि यथा स्यात्तदार्थं पृथक्सूत्रारम्भः। वाक्यात् अपरोक्षार्थत्वावगमात् स्म इत्युपपदयागाच्च अनेन सूत्रेण ब्रूञ् वक्तायां वाचि इति धातोः लटि ब्रवीति इति रूपं भवति।

## ४. ननौ पृष्टप्रतिवचने ३.२.१२०

ननु इति शब्दस्य सप्तम्यन्तरूपं ननौ इति। प्रतिरूपं वचनमिति प्रतिवचनम् इत्यस्य उत्तरम् इत्यर्थः। पृष्टपूर्वकप्रतिवचनं पृष्टप्रतिवचनम्, शाकपार्थिवादित्वान्मध्यमपदलोपी समासः, तस्मिन् पृष्टप्रतिवचने इति सप्तम्यन्तं पदम्। अत्र **प्रत्ययः** [76] **परश्च** [77] **आद्युदात्तश्च** [78] **धातोः** [79] **भूते** [80] इत्येतानि अधिक्रियन्ते। अत्र **लट् स्मे** [81]इत्यतः लट् इति अनुवर्तते।

ननु इत्युपपदे सति भूतार्थे पृष्टप्रतिवचने गम्यमाने धातोः परः लट् भवति।

**अकार्षीः कटं देवदत्त? ननु करोमि भोः।** इत्युदाहरणे **अकार्षीः कटं देवदत्त** इत्येष प्रश्नः, **ननु करोमि भोः**इत्येतत् प्रश्नपूर्वकं प्रतिवचनम्। **अकार्षीः कटं देवदत्त**? इति पृष्टवाक्यस्य प्रतिवचने वाक्ये **ननु करोमि भोः** इत्यत्र ननु इति उपपदे डुकृञ् करणे इति धातोः लटि करोमि इति सिद्ध्यति। पृष्टप्रतिवचने अगम्यमाने सति भूतार्थे लुङि अकार्षम् इति प्रयोगो स्याद्।

यथा काशिकावृत्तौ- **अनद्यतने परोक्षे इति निवृत्तम्। भूतसामान्ये विधिरयम्। ननुशब्दे उपपदे प्रश्नपूर्वके प्रतिवचने भूते ऽर्थे लट् प्रययो भवति। लुङो ऽपवादः।**

## ५. नन्वोर्विभाषा (३.२.१२१)

नश्च नुश्च इति ननौ इति इतरेतरद्वन्द्वः। तयोः नन्वोः सप्तमीद्विवचनान्तं पदम्। , विभाषा इति प्रथमैकवचनान्तं पदम्। अत्र **प्रत्ययः** [82] **परश्च** [83] **आद्युदात्तश्च** [84] **धातोः** [85] **भूते** [86] इत्येतानि अधिक्रियन्ते। अत्र **लट् स्मे** [87] इत्यतः लट् इति, **ननौ पृष्टप्रतिवचने** [88] इत्यतः प्रतिवचने इति च अनुवर्तते।

---

75 तत्रैव ३.२.११८
76 अ ध्या ३.१.१
77 तत्रैव ३.१.२
78 तत्रैव ३.१.३
79 तत्रैव ३.१.९१
80 तत्रैव ३.२.८४
81 तत्रैव ३.२.११८
82 तत्रैव ३.१.१
83 तत्रैव ३.१.२
84 तत्रैव ३.१.३
85 तत्रैव ३.१.९१

न-शब्दयोगे नु-शब्दयोगे च भूतार्थे धातोः परः विभाषया लट् भवति।

**अकार्षीः कटं देवदत्त? न करोमि भोः, नाकार्षम्। अहं नु करोमि, अहं नु अकार्षम्।** इत्युदाहरणे इत्युदाहरणे **अकार्षीः कटं देवदत्त** इत्येष प्रश्नः, **न करोमि भोः, नाकार्षम्** इतिद्वयं प्रश्नपूर्वकं प्रतिवचनम्। **अकार्षीः कटं देवदत्त**? इति पृष्टवाक्यस्य प्रतिवचने वाक्ये **न करोमि भोः, नाकार्षम्** इत्यत्र न इति उपपदे डुकृञ् करणे इति धातोः प्रकृतसूत्रेण लङपबाध्य लटि करोमि इति सिद्ध्यति। पृष्टप्रतिवचने अगम्यमाने सति भूतार्थे लुङि अकार्षम् इति प्रयोगो स्याद्। तथैव नु-शब्दयोगेऽपि।

यथा काशिकावृत्तौ- **भूते इत्येव। नशब्दे नुशब्दे च उपपदे पृष्टप्रतिवचने विभषा लट् प्रत्ययो भवति भूते।**

## ६. पुरि लुङ् चास्मे। (३.२.१२२)

पुराशब्दस्य सप्तम्येकवचनान्तं रूपं पुरि इति भवति। लुङ् प्रथमैकवचनान्तं पदम्। च इति अव्ययम्। न स्म इति अस्म, तस्मिन् अस्मे इति सप्तम्येकवचनान्तं पदम्। अत्र अनद्यतनम् इति मण्डूकप्लुत्याऽनुवर्तते। अत्र **प्रत्ययः** [89] **परश्च**[90] **आद्युदात्तश्च** [91] **धातोः**[92] **भूते** [93] इत्येतानि अधिक्रियन्ते। अत्र सूत्रे चकाराद् **लट् स्मे** [94] इत्यतः लट् इति, **नन्वोर्विभाषा** [95] इति सूत्रात् विभाषा इति पदं अनुवर्तेते।

भूतानद्यतने पुराशब्दयोगे धातोः परः विभाषया लुङ् चाल्लट् भवति न तु स्मयोगे।

**वसन्ति इह पुरा छात्राः, अवात्सुरिह पुरा छात्राः**, इति वाक्ययोः सर्वत्र पुराशब्दयोगाद् वस निवासे इति धातोः लटि वसन्ति, लङि अवात्सुः इति रूपं भवति। यदा विभाषया सूत्रस्य प्रवृतिर्न भवति तदा लङि **अवसन्निह पुरा छात्राः** इति वाक्यप्रयोगः , तथा च परोक्षार्थे लिटि **ऊषुरिह पुरा छात्राः** इति वाक्यव्यवहारः।

अस्मे इति पदसामर्थ्यात् स्मयोगे केवलम् **लट् स्मे** [96] इति सूत्रेण लट्रूपं भवति। यथा **नडेन सम् पुरा अधीयते** इति वाक्यप्रयोगः।

## ७. यावत्पुरानिपातयोर्लट् (३.३.४)

---

86 तत्रैव ३.२.८४
87 तत्रैव ३.२.११८
88 तत्रैव ३.२.१२०
89 अ ध्या ३.१.१
90 तत्रैव ३.१.२
91 तत्रैव ३.१.३
92 तत्रैव ३.१.९१
93 तत्रैव ३.२.८४
94 तत्रैव ३.२.११८
95 तत्रैव ३.२.१२१
96 अ ध्या ३.२.११८

यावत् च पुरा च यावत्पुरौ, तौ च निपातौ यावत्पुरानिपातौ। यावत्पुरौ चैतौ निपातौ निश्चयं द्योतयतः। निपातनाद्विशेषणस्य परनिपातः। तयोः यावत्पुरानिपातयोः सप्तमीद्विवचनान्तं पदम्। लट् इति प्रथमैकवचनान्तं पदम्। **अत्र प्रत्ययः** [97] **परश्च** [98] **आद्युदात्तश्च**[99]इत्येतानि अधिक्रियन्ते। अत्र **भविष्यति गम्यादयः** [100] **इत्यतः** भविष्यति इति अनुवर्तते।

भविष्यति काले वाच्ये यावत्पुराशब्दयोर्निपातयोरुपपदयोः धातोर्लट् प्रत्ययो भवति।

यथा यावद्भुङ्क्ते इति। यावत् इति निपातयोगे भविष्यत्काले **लृट् शेषे च**[101]**)** इति लृट्प्राप्ते तदपबाध्य प्रकृतसूत्रेण भुज पालनव्यवहारयोः इत्यस्माद् धातोः लटि भुङ्क्ते इति भवति। क्रियापदस्य **भुजोऽनवने** [102] इत्यत्मनेपदम्। तथैव पुरा भुङ्क्ते इत्यत्रापि।

यत्परिमाणमस्य इति तत् परिमाणमस्येति वा विग्रहे **यत्तदेतेभ्यः परिमाणे वतुप्** [103] **इति** वतुपि **दृग्दृशवतुषु** [104] इत्यनुवर्त्तमाने **आ सर्वनाम्नः** [105] इत्यात्त्वे यावत् इति सिद्ध्यति। पृ पालनपूरणयोः इति धातोः **भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्** [106] इत्यादिना क्विप्प्रत्यते धातोः **उदोष्ठपूर्वस्य** [107]इत्युत्त्वे करणे तृतीयैकवचने पुरा इति सिद्ध्यति। एतौ च व्युत्पादितौ। एतयोर्योगे लट् लकारो न भवति। अपितु लृटि **यावद्दास्यति तावद्भोक्ष्यते इति, पुरा व्रजिष्यति इति** व्यवहारौ भवतः।

सूत्रे चाव्युत्पन्नावेव यावत्पुराशब्दौ निपातौ गृह्येते। सूत्रे निपातग्रहणाभावेऽपि तत्र लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् इति परिभाषयैव तयोर्निपातयोर्ग्रहणं भविष्यति, तथापि मन्दबुद्धीनां प्रतिपत्तिगौरवपरिहार्थं सूत्रे निपातपदस्य ग्रहणम्। केचन सूत्रमिदं अस्याः परिभाषाया अनित्यत्वज्ञापनार्थम् इति वदन्ति।

## ८. विभाषा कदाकर्ह्योः (३.३.५)

विभाषा इति प्रथमैकवचनान्तं पदम्। कदाश्च कर्हिश्च इति कदाकर्ही, तयोः कदाकर्ह्योः इति सप्तमीद्विवचनान्तं पदम्। अत्र **प्रत्ययः** [108] **परश्च** [109] **आद्युदात्तश्च (३.१.३) धातोः** [110] इत्येतानि अधिक्रियन्ते। अत्र **भविष्यति गम्यादयः** [111] **इत्यतः** भविष्यति इति, **यावत्पुरानिपातयोर्लट्** [112] इत्यतः लट् इति च अनुवर्तते।

---

97 तत्रैव ३.१.१
98 तत्रैव ३.१.२
99 तत्रैव ३.१.९१
100 तत्रैव ३.३.३
101 तत्रैव ३.२.१३
102 तत्रैव १.३.६६
103 तत्रैव ५.२.३९
104 अ ध्या ६.३.८८
105 तत्रैव ६.३.९०
106 तत्रैव ३.२.१७७
107 तत्रैव ७.१.१०२
108 तत्रैव ३.१.१

भविष्यति काले वाच्ये कदाकर्ह्योरुपपदयोः धातोर्लट् प्रत्ययो विकल्पेन भवति।

कदा भुङ्क्ते इत्यत्र कदा इति उपपदे भविष्यत्काले **लृट् शेषे च** [113] इति लृट्प्राप्ते तदपबाध्य प्रकृतसूत्रेण भुज पालनव्यवहारयोः इत्यस्माद् धातोः लटि भुङ्क्ते इति भवति। क्रियापदस्य **भुजोऽनवने** [114] इत्यत्मनेपदम्। विभाषा पक्षे तु अनद्यतने भविष्यति **अनद्यतने लुट्** [115] इति लुटि **कदा भोक्ष्यते** इति व्यवहारः, सामान्ये भविष्यति **लृट् शेषे च** [116] इति लृटि **कदा भोक्ता** इति व्यवहारश्च भवति। तदैव कर्हि इति यौगे यथाक्रमं **कर्हि भुङ्क्ते, कर्हि भोक्ष्यते, कर्हि भोक्ता** इति व्यवहाराः।।

## ९. किं वृत्ते लिप्सायाम् (३.३.६)

वर्ततेऽस्मिन्निति विग्रहे **क्तोऽधिकरणे च** इत्यधिकरणे क्तप्रत्यये वृतम् इति शब्दः निष्पन्नः। किमः वृत्तं इति किंवृत्तम्। किम् इत्यस्माद् यानि रूपाणि भवन्ति तेषां ग्रहणं किंवृत्तम् इति पदेन भवति। एतद्विषये आह पदमञ्जरीकारः- **यत्र किंशब्दोऽवयवत्वेन वर्तते तत्सर्वं किंवृतम् इति।** तस्मिन् किंवृत्ते इति सप्तम्येकवचनान्तं पदम्। किमेतच्छब्दरूपं विभक्त्यन्तं वृत्तग्रहणेन प्रतीयते। तेन **किंयत्तदौर्निर्धारणे द्वयोरेकस्य डतरच्** [117] इत्यनेन, **वा बहूनां जातिपरिप्रश्ने डतमच्** [118] इत्यनेन च यथाक्रमं इत्येतौ डतरडतमौ प्रत्ययौ किंशब्दसम्बन्धिनावेव वृत्तग्रहणेन प्रतीयते। लब्धुमिच्छा लिप्सा, प्रार्थनाभिलाषःइति तदर्थः। तस्यां लिप्सायाम् इति सप्तम्येकवचनान्तं पदम्। अत्र **प्रत्ययः** [119] **परश्च** [120] **आद्युदात्तश्च** [121] **धातोः** [122] इत्येतानि अधिक्रियन्ते। अत्र **भविष्यति गम्यादयः** [123] **इत्यतः** भविष्यति इति, **यावत्पुरानिपातयोर्लट्** [124] इत्यतः लट् इति **विभाषा कदाकर्ह्योः** [125] इति च अनुवर्तन्ते।

किंवृत्तयोगे भविष्यति काले वाच्ये धातोर्लट् प्रत्ययो विकल्पेन भवति।

---

109 तत्रैव ३.१.२
110 तत्रैव ३.१.९१
111 तत्रैव ३.३.३
112 तत्रैव ३.३.४
113 तत्रैव ३.२.१३
114 अ ध्या १.३.६६
115 तत्रैव ३.२.१५
116 तत्रैव ३.२.१३
117 तत्रैव ५.३.९२
118 तत्रैव ५.३.९३
119 तत्रैव ३.१.१
120 तत्रैव ३.१.२
121 तत्रैव ३.१.३
122 तत्रैव ३.१.९१
123 तत्रैव ३.३.३
124 तत्रैव ३.३.४
125 तत्रैव ३.३.५

**कं भवन्तो भोजयन्ति, कं भवन्तो भोजयितारः**इत्यादौ किंवृत्तम् कम् इति उपपदयोगे भविष्यति काले गम्यमाने भुज पालनव्यवहारयोः इत्यस्माद् धातोः **लृट् शेषे च** [126] इति लृट्प्राप्ते तदपबाध्य प्रकृतसूत्रेण लटि भोजयन्ति इति भवति।

**लब्धुकामः पृच्छति कतरो भिक्षां दास्यति, ददाति, दाता वा। कतमो भिक्षां दास्यति, ददाति, दाता वा।** इत्यादिषु अपि कतरः कतमः इति किंवृत्तयोगे पूर्ववद् लड् विधानम्।

**कः पाटलिपुत्रं गमिष्यति** इत्यस्माद् वाक्याद् लिप्साभिन्नार्थतगम्यमानत्वात् वाक्ये गम्लृ गतौ इति धातोः **लृट् शेषे च** [127]इति लृटि गमिष्यति इति प्रयोगः क्रियते।

## १०. लिप्स्यमानसिद्धौ च (३.३.७)

लिप्स्यते प्राप्तुमिष्यते यत् तत् इति कर्मणि शानच्प्रत्यते लिप्स्यमानम् इति भवति। लिप्स्यमानात् सिद्धिः इति लिप्स्यमानसिद्धिः इत्यत्र निपातनाद्वा पञ्चमीसमासः। तस्मिन् लिप्स्यमानसिद्धौ ति सप्तम्येकवचनान्तं पदम्। च इति अव्ययम्। अत्र **प्रत्ययः** [128] **परश्च**[129]**) आद्युदात्तश्च** [130] **धातोः** [131] इत्येतानि अधिक्रियन्ते। अत्र **भविष्यति गम्यादयः** [132] **इत्यतः** भविष्यति इति, **यावत्पुरानिपातयोर्लट्** [133] इत्यतः लट् इति **विभाषा कदाकर्ह्योः** [134] इति च अनुवर्तन्ते।

लिप्स्यमानसिद्धौ गम्यमानायां भविष्यति काले धातोः परः विभाषया लट् प्रत्ययो भवति।

यो भक्तं ददाति स स्वर्गं गच्छति, अस्य वाक्यस्य लिप्स्यमानाद् भक्तात् स्वर्गसिद्धिमाचक्षाणो दातारं प्रोत्साहयति इति तात्पर्यार्थः अवगम्यते। अतः वाक्ये विद्यमानयोः डुदाञ् दाने इति गम्लृ गतौ इति च धात्वोःप्रकृतसूत्रेण भविष्यति काले लट् प्रत्यये ददाति , गच्छति इति रूपे भवतः। विभाषा पक्षे तु अनद्यतने भविष्यति **अनद्यतने लुट्** [135] इति लुटि **यो भक्तं दास्यति स स्वर्गं गमिष्यति** इति व्यवहारः, सामान्ये भविष्यति **लृट् शेषे च** [136] इति लृटि **यो भक्तं दात स स्वर्गं गन्ता** इति व्यवहारश्च भवति।

लिप्सायामेव सत्यां सूत्रस्य प्रवृतिर्सम्भवति। यत्र लिप्स्यमानसिद्धिर्गम्यते तत्रावश्यं लिप्सया भवितव्यम्, तथा च पूर्वेणैव सिद्धे सूत्रमिदं किमर्थमारब्धमिति पृच्छायां काशिकाकारः वदति- **अकिंवृत्तार्थोऽयमारम्भः** इति।

---

126 अ ध्या ३.२.१३
127 तत्रैव ३.२.१३
128 तत्रैव ३.१.१
129 तत्रैव ३.१.२
130 तत्रैव ३.१.३
131 तत्रैव ३.१.९१
132 तत्रैव ३.३.३
133 तत्रैव ३.३.४
134 तत्रैव ३.३.५
135 अ.ध्या ३.२.१५
136 तत्रैव ३.२.१३

अर्थात् यद्येवम् पूर्वसूत्र एव किंवृत्तग्रहणमकृत्वा प्रत्ययो विधीयते तदा एवं हीदं सूत्रं नारब्धव्यं भवति। तथा सति यथा लिप्स्यमानसिद्धौ गम्यमानायां किंवृत्ते चाकिंवृत्ते च लड् भवति तथा यत्र लिप्स्यमानसिद्धिरहितं लिप्स्यमानं गम्यं तत्रापि स्यात्। किंवृत्त एव तत् तत्रेष्यते, तस्मात् पूर्वसूत्रे किंवृत्तग्रहणं कर्तव्यम्। ततश्च सूत्रारम्भसामर्थ्याज्ज्ञायते सूत्रमिदम् अकिंवृत्तयोगे एव प्रवर्तते।

## ११. लोडर्थ लक्षणे च (३.३.८)

लोटोऽर्थः लोडर्थः इति षष्ठीतत्पुरुषसमासः। लोडर्थः प्रैषादिर्लक्ष्यते येन स लोडर्थलक्षणो धात्वर्थः। प्रैषादिः इति आदिशब्देन विधिनिमन्त्रणामन्त्रणाधीष्टादयो गम्यन्ते। सूत्रे लोडर्थलक्षणे इति सप्तम्येकवचनान्तं पदम्। च इति अव्ययम्। **अत्र प्रत्ययः** [137] **परश्च** [138] **आद्युदात्तश्च** [139] **धातोः** [140] इत्येतानि अधिक्रियन्ते। अत्र **भविष्यति गम्यादयः** [141] **इत्यतः** भविष्यति इति, **यावत्पुरानिपातयोर्लट्** [142] इत्यतः लट् इति **विभाषा कदाकर्ह्योः** [143] इति च अनुवर्तन्ते।

लोडर्थे गम्यमाने वर्तमानाद् धातोः भविष्यति काले विभाषया लट् प्रत्ययो भवति।

उपाध्यायश्चेदागच्छति अथ त्वं छन्दोधीष्व, अथ त्वं व्याकरणम् अधीष्व इति वाक्याद् उपाध्यायस्य आगमनं लोडर्थस्य छन्दाध्ययनप्रैष्यस्य लक्षणम् अर्थात् परिच्छेदकत्वमिति ज्ञायते। अतः प्रकृतसूत्रेण आङ् उपसर्गयोगे गम्लृ गतौ इति धातोः लटि आगच्छति इति रूपं सिद्ध्यति। विकल्पपक्षे अनद्यतने भविष्यति **अनद्यतने लुट्** [144] इति लुटि **उपाध्यायश्चेदागमिष्यति अथ त्वं छन्दोऽधीष्व, अथ त्वं व्याकरणम् अधीष्व** इति व्यवहारः, सामान्ये भविष्यति **लृट् शेषे च** [145] इति लृटि **उपाध्यायश्चेदागन्ता अथ त्वं छन्दोऽधीष्व, अथ त्वं व्याकरणम् अधीष्व** इति व्यवहारश्च भवति।

## १२. वर्तमानसामीप्ये वर्तमानवद्वा (३.३.१३१)

समीपम् एव सामीप्यम्, वर्तमानस्य सामीप्यमिति वर्तमानसामीप्यम् इति षष्ठीतत्पुरुषसमासः। तस्मिन् वर्तमानसामीप्ये इति सप्तम्येकवचनान्तं पदम्। वर्तमानेन तुल्यम् इति **तेन तुल्यं क्रिया चेद्वतिः** [146] इति सूत्रेण वतिप्रत्यये वर्तमानवत् इति अव्ययं सिद्ध्यति। वा अव्ययं पदम्। सूत्रेऽस्मिन् **प्रत्ययः**[147] **परश्च**[148] **आद्युदात्तश्च** [149]

---

137 तत्रैव ३.१.१
138 तत्रैव ३.१.२
139 तत्रैव ३.१.३
140 तत्रैव ३.१.९१
141 अ. ध्या ३.३.३
142 तत्रैव ३.३.४
143 तत्रैव ३.३.५
144 तत्रैव ३.२.१५
145 तत्रैव ३.२.१३
146 तत्रैव ५.१.११५
147 तत्रैव ३.१.१

**धातोः**[150] इत्येतानि अधिक्रियन्ते। अत्र **यावत्पुरानिपातयोर्लट्** [151] इत्यतः लट् इति **विभाषा कदाकर्ह्योः**[152] इति च अनुवर्तते।

**वर्तमाने लट्** [153]इत्यारभ्य **उणादयो बहुलम् (३.३.१)** [154]इति यावद वर्तामाने प्रत्यया उक्ताः ते वर्तमानसमीपे भूते भविष्यति च वर्तमानाद् धातोः भवन्ति।

यथा वर्तमाने लट्लकारो विधीयते, तथैव वर्तमानसामीप्येऽपि लट्लकारो भवति। वर्तमानसामीप्यञ्च वर्तमानकालानन्तरं यावत्क्षणं वर्तमानस्य संस्कारः भूते भविष्यति चानुभूयते तस्य सर्वस्यापि कालस्य वर्तमानपदेन ग्रहणं भवति। भर्तृहरिरपि प्रमाणयति -

**अध्वनो वर्तमानस्य यः शेषो य उपक्रमः।**
**तद्वर्तमानसामीप्यं शास्त्रभेदे न दर्शितम्॥**

**कदा देवदत्त आगतोऽसि? अयम् आगच्छामि** इति वर्तमानसामीप्यभूतकालस्य उदाहरणम्। वाक्यस्याशयः तत्वबोधिन्याम्- **कदा आगतोऽसीति भूतकालेन प्रश्नवाक्यम्, आगच्छामीत्युदाहरणे भूतकालाभिव्यक्तयेऽयमिति प्रयोगस्त्विदानीमेवागमम् इति वर्तमानसमीपभूतकालद्योतनाय। तेन ह्यागमनाऽविनाभूतं यद्रूपं परिकरबन्धादियुक्तं तत्प्रतिनिर्दिश्यते।** अतः उत्तरवाक्ये लट् प्रयोगः।

वस्तुतः वर्तमानकाले विहितेन लडादिना पदसंस्कारे क्रियमाणे पश्चात् वाक्ये पदान्तरसम्बन्धात् तत्सामीप्ये प्रतीयमाने भूतभविष्यतोरपि वर्तमानत्वारोपेण सिद्धौ सूत्रं विनाऽपि कार्यसिद्धिः। एवमेव वसन् ददर्श इत्यादौ भूतकालेऽपि लट्लकारे जाते तस्य स्थाने "लट: शतृशानचौ" इति सूत्रेण शतृप्रत्यये कृते वसन् इत्यस्य सिद्धिः। एतावता सूत्रेणैव गतार्थम्।

## १३. गर्हायां लडपिजात्वोः (३.३१४२)

गर्ह्यते निन्द्यते इति गर्ह कुत्सने इति धातो **गुरोश्च हलः)**[155] इति स्त्रियाम् अप्रत्यये ततः टापि गर्हा इति सिद्ध्यति। निन्दा इति तदर्थः। तस्यां गर्हायाम् इति सप्तम्येकवचनान्तं पदम्। लट् इति प्रथमैकवचन ान्तं पदम्। अपिश्च जातुश्च इति अपिजातू, तयोः , अपिजात्वोः इति सप्तमीद्विवचन ान्तं पदम्। अत्र सूत्रेऽस्मिन् **प्रत्ययः**[156]**परश्च** [157]**आद्युदात्तश्च**[158] **धातोः** [159] इत्येतानि अधिक्रियन्ते।

---

148 तत्रैव ३.१.२
149 तत्रैव ३.१.३
150 तत्रैव ३.१.९
151 अ ध्या ३.३.४
152 तत्रैव ३.३.५
153 तत्रैव ३.२.१२३
154 तत्रैव ३.२.१२३
155 अ. ध्या ३.३.१३
156 तत्रैव ३.१.१

गर्हायां गम्यमानायाम् अपिजात्वोः उपपदयोः धातोः परः कालसामान्ये लट् प्रत्ययो भवति।

पूर्वं भूते कालविशेषे लङलिटौ विहितौ, भविष्यति लुङलृटौ च। तान् सर्वान् प्रकृतसूत्रेण कालसामान्ये विधीयमानो लट् परत्वाद्बाधते। **वर्तमाने लट्** [160]इति विधीयमानः लट् कालसामान्ये न प्राप्नोति इति प्रकृतसूत्रेण तत् विधीयते। **अपि तत्रभवान् वृषलं याजयति, जातु तत्रभवान् वृषलं याजयति** इत्यादौ ताच्छील्यप्रतिपादनेनात्र गर्हा ज्ञायते। अत्र अपिजात्वोः योगयोः याजयति इत्यत्र यज पूजासंगतिकरणदानेषु इति धातोः लट्।

# द्वितीयोऽध्यायः (भूतलकारः)

**भूतकालः**

157 तत्रैव ३.१.२
158 तत्रैव ३.१.३
159 तत्रैव ३.१.९
160 तत्रैव ३.२.१२३

भाव्यते स्म इति विग्रहे भू सत्तायाम् इति धातोः भूतार्थे कर्त्तरि क्तप्रत्यये भूतम् इति शब्दो निष्पन्नः। **वर्तमानकालध्वंसप्रतियोगित्वं भूतत्वम् इति** भूतकालस्य लक्षणम्। घटे ध्वस्ते सति अतीतोऽयं घट इति व्यवहारो जायते, तत्र हि वर्तमानो यो ध्वंस इत्युक्ते इदानीं विद्यमानः घटध्वंसः, तत्प्रतियोगित्वं घटे अस्तीति घटः अतीत इति , भूतकालिक इति वा व्यवहारः। भूतकालः **सामान्यः, अनद्यतनः, परोक्षः** इति भेदेन त्रिधा विभज्यते।

**लिट् लकारः(परोक्ष अनद्यतनः)**

**परोक्षे लिट् (3.2.115)**

परोक्षे इति सप्तम्येकवचनान्तं पदम्। लिट् इति प्रथमैकवचनान्तं पदम्। सूत्रे **अनद्यतने लुट्** [161] इत्यतः अनद्यतने इति अनुवर्तते। अत्र **प्रत्ययः** [162] **परश्च**[163] **आद्युदात्तश्च** [164] **धातोः**[165] **भूते** [166] इत्येतानि अधिक्रियन्ते।

परोक्षे अनद्यतने भूते धातोः परः लिट् प्रत्ययः भवति इति सूत्रार्थः। यथा - रामः वनम् जगाम । कृष्णः कंसम् जहान । त्वं ह्यः गीतां पपाठिथ ।

**अनद्यतनपदविचारः**

तथा हि कालो द्विविधः अद्यतनो अनद्यतनश्चेति। तद्भिन्नः अनद्यतनः। परोक्षानद्यतनभूते वर्तमानात्क्रियावाचकात् धातोः लिट् स्यादित्यर्थकेन परोक्षे लिडिति सूत्रेण भूतानद्यतनपरोक्षे लिड्विधानात् अनद्यतनभूतत्वं लिट्लकारस्यार्थः। अत एव नागेशेनोक्तम् - **लिडस्तु भूतानद्यतनकालः परोक्षत्वञ्चाधिकोऽर्थः, अनद्यतनशब्दे बहुव्रीहिसमासः, न विद्यतेऽद्यतनो यस्मिन्निति अनद्यतनः।** अर्थात् अद्यतनाद् भिन्नः कालः अनद्यतन काल इति। तत्राभावज्ञाने प्रतियोगिज्ञानस्य कारणतया आदौ अद्यतनकाल: परिभाषणीयः। तच्च लक्षणम्- अतीतायाः **रात्रेः पश्चार्धेन आगामिन्याः रात्रेः पूर्वार्धन च सहितो दिवसो अद्यतनः** इति।

यद्यपि अत्र विषये कैयटहरदत्ताद्याचार्याणां दृश्यते विवादः। ते वदन्ति **सम्पूर्णो दिवसः व्यतीतायाः रात्रेश्च चतुर्थो भागः आगमिन्याश्च प्रथमो भागः अद्यतनपदेन गृह्यते**।

अन्ये वदन्ति **अतीतायाः रात्रेः पूर्वाधेर्न, आगामिन्याः पश्चाद्र्धन सहितः कालः अद्यतनपदेन स्वीकार्यः।** लुङ्लकारस्य व्याख्यानप्रसङ्गे न्यासकृता अपि तथैवोपपादितम्। एवं रीत्या अद्यतनपदार्थः सर्वत्र भिन्न भिन्नः स्वीकृतः। तभिन्नः कालः अनद्यतनपदेन गृहीतव्यः।

---

161 अ ध्या 3.2.111

162 तत्रैव ३.१.१

163 तत्रैव ३.१.२

164 तत्रैव ३.१.३

165 तत्रैव ३.१.९१

166 तत्रैव ३.२.८४

**<u>परोक्षपदविचारः</u>**

सूत्रज्ञापनात् एव परोक्षम् इति शब्दः निपात्यते। अक्ष्णः परमिति विग्रहे ज्ञापनात् अव्ययीभावसमासे कृते पराक्षमिति प्राप्ते परोक्षे लिट् इति सूत्रे परोक्षे इति निपातनात् परस्य इति पदस्य ओकारादेशः निपात्यते। अक्ष्णः परं परोक्षमिति व्युत्पत्या निष्पन्ने परोक्षशब्दे अक्षिशब्द: इन्द्रियमात्रस्य वाचक न तु नेत्रविशेषस्य। अत एव नागेशः प्रतिपादयति **वृत्तिविषयेऽक्षिशब्दः सर्वेन्द्रियबोधकः न तु चक्षुः पर्यायः इति।** एतद्व्याख्यानेन परोक्षस्य निष्कृष्टं लक्षणमायाति **इन्द्रियजन्यज्ञानाविषयत्वं परोक्षत्वम् इति।** भगवान् पतञ्जलिः परोक्षविषये चत्वारि मतानि प्रतिपादितानि। तद्यथा -

**(१) वर्षशतवृत्तं परोक्षम्।**
**(२) वर्षसहस्रवृत्तं परोक्षम्।**
**(३) कुड्यकुटान्तरितं परोक्षम्।**
(४) **द्वयहवृत्तं त्र्यहवृत्तं परोक्षम्।**

एवं च चतुरः पक्षान् व्यवस्थाप्य न कश्चन पक्षः सिद्धान्ततया व्यवस्थापितः भाष्यकृता। एवम्भूते परोक्षे **पपाच** इति लिट्लकारस्य प्रयोगो भवति। अत्र विषये कौण्डभट्टः साक्षात् करोमि इति **ज्ञानाविषयत्वमेव परोक्षमिति** स्वीकरोति। एवम्भूतः परोक्षः कुत्रान्वेति इति प्रश्ने त्रयः पक्षाः सम्भवन्ति।

**(१) परोक्षः काले विशेषणम्।**
**(२) क्रियायां विशेषणम्।**
**(३) साधने विशेषणम्।**

एषु त्रिषु पक्षेषु तृतीयः पक्ष: सिद्धान्तितो भाष्ये। क्रियायाः पारोक्ष्यस्य खण्डनन्तु कौण्डभट्टः करोति –

**क्रिया नामेयमत्यन्तमपरिदृष्टा पूर्वापराभूतावयवा न शक्या पिण्डीभूता निदर्शयितुम्** इति क्रियायाः अतीन्द्रियत्वं सिध्यति। तस्मात् सर्वापि क्रिया परोक्षैव, अतः क्रियायाः पारोक्ष्यस्य विशेषणत्वे व्यावर्तकं न स्यात् तस्मात् विशेषणपदं व्यर्थमेव। अतः क्रियायां परोक्षमिति न विशेषणमिति। कौण्डभट्टः एतद्विषये यद्यपि स्वीयं समाधानं दत्तवान्। तेषामयमाशयः पिण्डरूपेण क्रियायाः प्रत्यक्षाभावेऽपि अवयवशः साक्षात् करोमि इति प्रतीतिसम्भवात् क्रियायां विशेषणं दातुं शक्यम्। अन्यथा **पश्य मृगो धावति** इत्यादौ धावनक्रियायाः दर्शनक्रियां प्रति कर्मत्वं नैव सिध्यति। नागेशस्तु तृतीयं पक्षं स्वीकरोति। उक्तं च तैः - **परोक्षत्वं च कारके विशेषणं न तु क्रियायाम्** इति।

**<u>पपाच इति रूपविचारः</u>**

यत्रावयवशः अपि क्रियायाः प्रत्यक्षत्वं न सम्भवति तत्रैव परोक्षत्वव्यवहारः। अत्र कर्तुः प्रत्यक्षत्वे क्रियायाः प्रत्यक्षत्वसम्भवात् कथं **पपाच** इति प्रयोगः। एवं च स्वकर्तृक्रियायाः तादृशपरोक्षत्वासम्भवेन **व्यातेने किरणावलीमुदयनः** इति कथं सङ्गच्छते। अतः उत्तमपुरुषे लिट् प्रयोग अनुपपन्नः अत एव भाष्यकारोऽपि वदति –

**सर्वथोत्तमो न सिध्यति** इति।

सिद्धस्य गतिः चिन्तनीयेति रीत्या **कौण्डभट्टैः** अत्रोच्यते – व्यासङ्गादिना स्वव्यापारस्य परोक्षत्वोपपादनेन कथञ्चित्तमपुरुषे लिट्लकारस्य व्यवस्थोपपादनीया। किन्तु कौण्डभट्टः न सहते।

तैरुच्यते बहुतरमन:प्रणिधानसाध्यशास्त्रार्थनिर्णयजनकशब्दरचनात्मके ग्रन्थे अनद्यतनत्वातीतत्वयोर्विस्तारक्रियायामसत्वेन अनद्यतनातीतत्वयोरभावेन तदर्थकलिडसम्भवात्। तस्मात् कौण्डभट्टस्याभिमतिरत्र नास्ति।

**श्रीमता दीक्षितेन** चित्तविक्षेपादिनोत्तमपुरुषे लिङ्लकारस्य व्यवस्था कृता। उक्तं च तेन-

**उत्तमे पुरुषे चित्तविक्षेपादिना परोक्ष्यम् इति।**

तस्याशयः यत्र कर्ता स्वस्य ज्ञानं विना एव यथा सुप्तावस्थायाम्, संमोहन-अवस्थायाम्, नशां कृत्वा वा किञ्चित् कार्यम् करोति तत्र अनन्तरम् तस्य कार्यस्य उल्लेखं कर्तुम् कर्ता लिट्-लकारस्य प्रयोगः कर्तुं शक्नोति । यथा **यदा अहं सुप्तः आसम् तदा निद्रायां स्थितौ एव किञ्चित् उक्तवान् वा** इत्यर्थको **सुप्तोऽहं किल विललाप** स्वव्यापारस्य व्यासङ्गादिना प्रत्यक्षाभावात् परोक्षत्वसमाश्रित्य उत्तमपुरुषे लिट्लकारस्य व्यवस्था विज्ञेया।

**वैयाकरणसिद्धान्तप्रवर्तकानां भाष्यकाराणां** मते मन:संयुक्तेन्द्रियस्य विषयोपलब्धौ कारणत्वात् मन:संयोगाभावे इन्द्रियार्थसन्निकर्षे सत्यपि परोक्षत्वं भवत्येव। अत एव **सुप्तमन्तयोरुत्तमः** इति वार्तिकव्याख्यावसरे भाष्यकारेण प्रोक्तम् - अथवा भवति वै कश्चिद् जगदपि वर्तमानकाल: नोपलभ्यते। तद्यथा वैयाकरणानां शाकटायनो रथमार्गे आसीन: शकटसार्थं यान्तं नोपलेभे। किं पुनः कारणं कश्चिद् जाग्रदपि वर्तमानकालं नोपालभत। मनसः प्रयुक्तानि इन्द्रियाणि कारणानि भवन्त्युपलब्धौ। एवं रीत्या वैवक्षिक परोक्ष्यं सर्वत्र ग्राह्यम्।

## प्रश्ने चासन्नकाले (3.2.117)

प्रष्टव्यः इति विग्रहे कर्मणि**यजयाचयतविच्छप्रच्छरक्षो नङ्**[167]**.** इति नङ्प्रत्यये प्रश्नः इति निष्पन्नः। प्रश्ने इति सप्तम्येकवचनान्तं पदम्। च इति अव्ययम्। आसन्नश्च असौ कालः इति आसन्नकालः, तस्मिन् आसन्नकाले इति सप्तम्येकवचनान्तं पदम्। तत्र **पञ्चवर्षाभ्यन्तरमासन्नकालम्, पञ्चवर्षातीतं तु विप्रकृष्टकालमिति** नैयायिका वर्णयन्ति। सूत्रे **अनद्यतने लुट्**[168] इत्यतः अनद्यतने, **परोक्षे लिट्**[169] इति सूत्रं, **हशश्वतोर्लङ् च** [170] इत्यतः लङ्

167 तत्रैव 3.3.903
168 अ ध्या 3.2.111
169 तत्रैव (3.2.115)
170तत्रैव 3.2.116

इति च अनुवर्तते। अत्र **प्रत्ययः** [171] **परश्च**[172] **आद्युदात्तश्च** [173] **धातोः**[174] **भूते** [175] इत्येतानि अधिक्रियन्ते। आसनकालिरके भूतानद्यतनपरोक्षार्थधात्वर्थे प्रष्टव्ये सति वर्तमानाद् धातोः लङ्लिटौ प्रत्ययौ स्तः।

यथोदाहरणं काशिकायाम्- **कश्चित् कञ्चत् पृच्छति। अगच्छद् देवदत्तः? जगाम देवदत्तः? अयजद् देवदत्तः? इयाज देवदत्तः?इति।** अत्र सर्वत्र प्रकृतसूत्रनिमित्तत्वात् लङ्लिटौ प्रत्ययौ विधीयेते।

**जगाम देवदत्तः** इति वाक्यात् प्रष्टव्यार्थः अनवगमात् अत्र न तौ प्रत्ययौ।

**भवन्तं पृच्छामि, जघान कंसं किल वासुदेवः इति** वाक्ये कंसवधोऽत्र पृच्छमानः अस्ति परन्तु घटनायाः विप्रकृष्टकालत्वात् अत्र प्रकृतसूत्रेण न उक्तौ प्रत्ययौः।

**छन्दसि लिट् (3.2.105)**

छन्दः इति शब्दः वेदपर्यायः। छन्दसि इति सप्तम्येकवचनान्तं पदम्। लिट् इति प्रथमैकवचनान्तं पदम्। अत्र **प्रत्ययः** [176] **परश्च**[177] **आद्युदात्तश्च** [178] **धातोः**[179] **भूते** [180] इत्येतानि अधिक्रियन्ते।

वेदे सामान्ये भूते लिट् भवति इति सूत्रार्थः।

**अहं सूर्यमुभयतो ददर्श** इति वेदवाक्यमस्ति। अत्र सामान्यभूत्रार्थे प्रकृतसूत्रेण दृशिर् प्रेक्षणे इति धातोः लिटि , **परस्मैपदानां णलतुसुस्थलथुसणल्वमाः** [181] णलि अनुबन्धलोपे **लिटि धातोरनभ्यासस्य** [182] द्वित्वे दृश्+दृश्+अ इति स्थिते अभ्याससंज्ञायाम्, `**उरत्**` [183] इत्यत्वे, रपरत्वे **हलादिशेषः** [184] इति हलादेर्शेषे द+दृश्+अ इति स्थिते **पुगन्तलघूपधस्य च** [185] गुणे ददर्श इति निष्पन्नः।

**छन्दसि लुङ्लङ्लिटः** [186] इत्यत्र `**धातुसम्बन्धे प्रत्ययाः**`[187] इत्यतो धातुसम्बन्धग्रहणानुवृत्तेः अनेन सूत्रेण धातुसंबन्धे सामान्येन लिट् विहितः। अनेन सूत्रेण **अहं सूर्यमुभयतो ददर्श, अहं ध्यावापृथिवी आततान** इत्यादिषु वाक्येषु धातुसंबन्धविरहत्वात् लिडप्राप्ते प्रकृत सूत्रेण त्वविषेषेण लिट् विधीयते।

**छन्दसि लुङ्लङ्लिटः (3.4.6)**

---

171 अ ध्या ३.१.१
172 तत्रैव ३.१.२
173 तत्रैव ३.१.३
174 तत्रैव ३.१.९१
175 तत्रैव ३.२.८४
176 अ ध्या ३.१.१
177 तत्रैव ३.१.२
178 तत्रैव ३.१.३
179 तत्रैव ३.१.९१
180 तत्रैव ३.२.८४
181 तत्रैव 3.4.82
182 तत्रैव 6.1.8
183 तत्रैव 7.4.66
184 तत्रैव 7.4.60
185 तत्रैव 7.3.86
186 अ ध्या 3.4.6
187 तत्रैव 3.4.1

छन्दसि इत सप्तम्येकवचनान्तं पदम्। लुङ् च लङ् च लिट् च इति इतरेतरद्वन्द्वे लुङ्लङ्लिटः इति प्रथमाबहुवचनान्तं पदम्। अत्र **धातुसम्बन्धे प्रत्ययाः**[188] इत्यतो धातुसम्बन्धे इति **समुच्चयेऽन्यतरस्याम्** [189] इत्यतः अन्यतरस्याम् इति च अनुवर्तते। अत्र **प्रत्ययः** [190] **परश्च**[191] **आद्युदात्तश्च** [192] **धातोः**[193] **भूते** [194] इत्येतानि अधिक्रियन्ते।

वेदे सामान्ये भूते धातुसम्बन्धे धातोः परः लुङ्लङ्लिटः प्रत्ययाः विकल्पेन भवन्ति इति सूत्रार्थः।

लुङ्लकारे- **शकलाङ्गुष्ठको ऽकरत्। अहं तेभ्योऽकरं नमः।** लङ्लकारे - **अग्निम् अद्य होतारम् अवृणीतायं यजमानः।** लिट्लकारे - **अद्या ममार।** इत्यादिष्वुदाहरणेषु वाक्येषु प्रकृतसूत्रेण लुङादयः अभवन्। सूत्रे अन्यतरस्याम् इति वर्तते अतः अन्येऽपि लकारा यथायथं भवन्ति। यथा **अद्य म्रियते** इत्युदाहरणम्।

### लङ् लकारः(अनद्यतनः भूतः)

### अनद्यतने लङ् (3.2.111)

अविद्यमानोऽद्यतनो यस्मिन्निति सोऽनद्यतन इति बहुव्रीहिः। तस्मिन् अनद्यतने इति सप्तम्येकवचनान्तं पदम्। लङ् इति प्रथमैकवचनान्तं पदम्। अत्र **प्रत्ययः** [195] **परश्च**[196] **आद्युदात्तश्च** [197] **धातोः**[198] **भूते** [199] इत्येतानि अधिक्रियन्ते। अनद्यतनभूतकालं द्योतयितुम् धातोः परः लङ्-लकारः प्रयुज्यते इति सूत्रार्थः।

यथा - सः ह्यः विद्यालयं न अगच्छत् । अहं गतसप्ताहे व्याकरणम् अपठम् । ते गतवर्षे स्नातकाः अभवन् ।

अनद्यतने इति बहुव्रीहिनिर्देशात् यत्राद्यतनगन्धोऽप्यस्ति तत्र लङा न भवितव्यमित्येषः अर्थो लभ्यते। अतः **अद्य ह्यो वा अभुक्ष्महि** इत्यस्मिन् उदाहरणे अद्य इति पदयोगात् न लङ्लकारो विधीयते।

यत्र क्रियायाः कालः अद्यतनभूतकालः अस्ति उत अनद्यतनभूतकालः अस्ति इत्येतत् स्पष्टं नास्ति, तत्र लङ्लकारस्य प्रयोगः न करणीयः, लुङ्लकारस्य प्रयोगः करणीयः । यथा - सः विद्यालयम् न अगमत् । अहं व्याकरणम् अपाठिषम् ।

### हशश्वतोर्लङ् च (3.2.116)

---

188 तत्रैव **3.4.1**
189 तत्रैव **3.4.3**
190 तत्रैव ३.१.१
191 तत्रैव ३.१.२
192 तत्रैव ३.१.३
193 तत्रैव ३.१.९१
194 तत्रैव ३.२.८४
195 अ ध्या ३.१.१
196 तत्रैव ३.१.२
197 तत्रैव ३.१.३
198 तत्रैव ३.१.९१
199 तत्रैव ३.२.८४

हश्च शश्वतश्च इति इतरतरेद्वन्द्वे हशश्वतौ, तयोः हशश्वतोः इति सप्तमीद्विवचनान्तं पदम्। लङ् इति प्रथमैकवचनान्तं पदम्। च इति अव्ययम्। वर्णयन्ति। सूत्रे **अनद्यतने लुट्**[200] इत्यतः अनद्यतने, **परोक्षे लिट्** [201] इति सूत्रं च अनुवर्तते। अत्र अत्र **प्रत्ययः** [202] **परश्च**[203] **आद्युदात्तश्च** [204] **धातोः**[205] **भूते** [206] इत्येतानि अधिक्रियन्ते।

भूतानद्यतनपरोक्षेऽर्थे लिड्विषये हाश्वतोः उपपदयोः लङ् प्रत्ययो भवति, चकाराल् लिट् च इति सूत्रार्थः।

**इति ह अकरोत्,** इत्यत्र भूतानद्यतनपरोक्षेऽर्थे वाक्यस्य विद्यमानत्वात् डुकृञ् करणे इति धातोः लिट्प्राप्ते प्रकृतसूत्रेण ह इत्युपपदयोगात् तदपबाध्य लङि अकरोत् इति भवति। लिटि च **इति ह चकार** इति व्यवहारः। तथैव **शश्वदकरोत्, शश्वच् चकार इत्य**स्मिन् वाक्ये शश्वत् इति शब्दयोगात् लङ्लिटौ भवतः।

## प्रश्ने चासन्नकाले (3.2.117)

प्रष्टव्यः इति विग्रहे कर्मणि **यजयाचयतविच्छप्रच्छरक्षो नङ्**[207] इति नङ्प्रत्यये प्रश्नः इति निष्पन्नः। प्रश्ने इति सप्तम्येकवचनान्तं पदम्। च इति अव्ययम्। आसन्नश्च असौ कालः इति आसन्नकालः, तस्मिन् आसन्नकाले इति सप्तम्येकवचनान्तं पदम्। तत्र **पञ्चवर्षाभ्यन्तरमासन्नकालम्, पञ्चवर्षातीतं तु विप्रकृष्टकालमिति** नैयायिका वर्णयन्ति। सूत्रे **अनद्यतने लुट्** [208] इत्यतः अनद्यतने, **परोक्षे लिट्** [209] इति सूत्रं, **हशश्वतोर्लङ् च** [210] इत्यतः लङ् इति च अनुवर्तते। अत्र **प्रत्ययः** [211] **परश्च**[212] **आद्युदात्तश्च** [213] **धातोः**[214] **भूते** [215] इत्येतानि अधिक्रियन्ते। आसनकालिरके भूतानद्यतनपरोक्षार्थधात्वर्थे प्रष्टव्ये सति वर्तमानाद् धातोः लङ्लिटौ प्रत्ययौ स्तः।

यथोदाहरणं काशिकायाम्- **कश्चित् कञ्चत् पृच्छति। अगच्छद् देवदत्तः? अयजद् देवदत्तः** अत्र सर्वत्र प्रकृतसूत्रनिमित्तत्वात् लङ् प्रत्ययो विधीयते। **जगाम देवदत्तः** इति वाक्यात् प्रष्टव्यार्थः अनवगमात् अत्र न तौ प्रत्ययौ। **भवन्तं पृच्छामि, जघान कंसं किल वासुदेवः इति** वाक्ये कंसवधोऽत्र पृच्छमानः अस्ति परन्तु घटनायाः विप्रकृष्टकालत्वात् अत्र प्रकृतसूत्रेण न उक्तौ प्रत्ययौः भवतः।

## पुरि लुङ् चास्मे (3.2.122)

पुराशब्दस्य सप्तम्येकवचनान्तं रूपं पुरि इति भवति। लुङ् प्रथमैकवचनान्तं पदम्। च इति अव्ययम्। न स्म इति अस्म, तस्मिन् अस्मे इति सप्तम्येकवचनान्तं पदम्। अत्र अनद्यतनम् इति मण्डूकप्लुत्याऽनुवर्तते। अत्र **प्रत्ययः**

---

[200] अ ध्या **3.2.111**
[201] तत्रैव **3.2.115**
202 अ ध्या ३.१.१
203 तत्रैव ३.१.२
204 तत्रैव ३.१.३
205 तत्रैव ३.१.९१
206 तत्रैव ३.२.८४
[207] तत्रैव **3.3.90**
[208] तत्रैव **3.2.111**
[209] तत्रैव **3.2.115**
[210] तत्रैव **3.2.116**
211 तत्रैव ३.१.१
212 तत्रैव ३.१.२
213 तत्रैव ३.१.३
214 तत्रैव ३.१.९१
215 तत्रैव ३.२.८४

[216] **परश्च**[217] **आद्युदात्तश्च** [218] **धातोः**[219] **भूते** [220] इत्येतानि अधिक्रियन्ते। अत्र सूत्रे चकाराद् **लट् स्मे** [221] इत्यतः लट् इति, **नन्वोर्विभाषा** [222] इति सूत्रात् विभाषा इति पदं अनुवर्तेते।

भूतानद्यतने पुराशब्दयोगे धातोः परः विभाषया लुङ् चाल्लट् भवति न तु स्मयोगे।

**वसन्ति इह पुरा छात्राः, अवात्सुरिह पुरा छात्राः**, इति वाक्ययोः सर्वत्र पुराशब्दयोगाद् वस निवासे इति धातोः लटि वसन्ति, लुङि अवात्सुः इति रूपं भवति। यदा विभाषया सूत्रस्य प्रवृतिर्न भवति तदा लङि **अवसन्निह पुरा छात्राः** इति वाक्यप्रयोगः , तथा च परोक्षार्थे लिटि **ऊषुरिह पुरा छात्राः** इति वाक्यव्यवहारः।

**स्मोत्तरे लङ् च (3.3.176)**

स्म उत्तरः यस्मात् तत् स्मोत्तरम्, तस्मिन् स्मोत्तरे इति सप्तम्येकवचनान्तं पदम्।  , लङ् इति प्रथमैकवचनान्तं पदम्। च इति अव्ययम्। अत्र **माङि लुङ्**[223]  इत्यतः लुङ् इति प्रथमैकवचनान्तं, माङि  इति सप्तम्येकवचानान्तञ्च पदमनुवर्तेते। अत्र **प्रत्ययः** [224] **परश्च**[225] **आद्युदात्तश्च** [226] **धातोः**[227] **भूते** [228] इत्येतानि अधिक्रियन्ते।

स्म यस्मात् परः अस्ति तादृशस्य माङ् अव्ययस्य विषये लुङ्लकारस्य लङ्लकारस्य वा प्रयोगः भवति ।

स्म तथा माङ् एते द्वे अव्यये स्तः । माङ्-अव्ययस्य प्रयोगः निषेधार्थम् भवति, तथा स्म इत्यस्य प्रयोगः किल  खलु सत्यम्  निश्चयेन वा इति अस्मिन् अर्थे भवति । माङ् अव्ययस्य उपस्थितौ धातोः **माङि लुङ्** [229] इत्यनेन केवलं लुङ्-लकारः एव विधीयते । परन्तु, अस्मात् माङ्-अव्ययात् अनन्तरम् स्म अव्ययम् अस्ति चेत् लङ्लकारस्यापि प्रयोगः भवितुम् अर्हति ।

यथा - **मा स्म गमः , मा स्म गच्छः । मा स्म कार्षीत्  मा स्म करोत्**  इत्यादिषु  **न माङ्योगे** [230] इत्यनेन माङ्-अव्ययस्य उपस्थितौ धातोः अडागमः  आडागमश्च न विधीयते।

**छन्दसि लुङ्ङ्लङ्लिटः(3.4.6)**

---

216 अ ध्या ३.१.१
217 तत्रैव ३.१.२
218 तत्रैव ३.१.३
219 तत्रैव ३.१.९१
220 तत्रैव ३.२.८४
221 तत्रैव ३.२.११८
222 तत्रैव ३.२.१२१
223 अ ध्या **3.3.175**
224 अ ध्या ३.१.१
225 तत्रैव ३.१.२
226 तत्रैव ३.१.३
227 तत्रैव ३.१.९१
228 तत्रैव ३.२.८४
229 तत्रैव **3.3.175**
230 तत्रैव **6.4.74**

छन्दसि इत सप्तम्येकवचनान्तं पदम्। लुङ् च लङ् च लिट् च इति इतरेतरद्वन्द्वे लुङ्लङ्लिटः इति प्रथमाबहुवचनान्तं पदम्। अत्र धातुसम्बन्धे प्रत्ययाः [231] इत्यतो धातुसम्बन्धे इति समुच्चयेऽन्यतरस्याम्[232] इत्यतः अन्यतरस्याम् इति च अनुवर्तते। अत्र **प्रत्ययः** [233] **परश्च**[234] **आद्युदात्तश्च** [235] **धातोः**[236] **भूते** [237] इत्येतानि अधिक्रियन्ते।

वेदे सामान्ये भूते धातुसम्बन्धे धातोः परः लुङ्लङ्लिटः प्रत्ययाः विकल्पेन भवन्ति इति सूत्रार्थः।

लङ्लकारे - **अग्निम् अद्य होतारम् अवृणीतायं यजमानः** इत्यादावुदाहरणे वाक्ये प्रकृतसूत्रेण लुङादयः अभवन्। सूत्रे अन्यतरस्याम् इति वर्तते अतः अन्येऽपि लकारा यथायथं भवन्ति। यथा **अद्य म्रियते** इत्युदाहरणम्।

**<u>लुङ् लकारः(सामान्यभूतः)</u>**

**<u>लुङ् (3.2.110)</u>**

लुङ् इति प्रथमान्तं पदम्। सूत्रेऽस्मिन् **प्रत्ययः** [238] **परश्च**[239] **आद्युदात्तश्च** [240] **धातोः**[241] **भूते** [242] इत्येतानि अधिक्रियन्ते।

सामान्यभूतकालं द्योतयितुम् धातोः परः आद्युदात्तः लुङ्-प्रत्ययः भवति इति सूत्रार्थः।

सः चित्रम् अद्राक्षीत् । यूयम गीताम् अपाठिष्ट । वृक्षाणि ऐधिषत । अहम् ग्रामम् न अगमम् । त्वं किम् अकार्षीः ? इत्यातानि उदाहरणानि।

रामः वनं जगाम इत्यत्र परोक्षानद्यतनभूतकालं दृश्यते अतः परोक्षे लिट् [243]इत्यनेन लिट्-लकारः विधीयते। तथा च **सः ह्यः ग्रामम् अगच्छत्** इत्यत्र अनद्यतन-भूतःकालः स्पष्टरूपेण निर्दिष्टः अस्ति, अतः अनद्यतने लङ्[244] इत्यनेन लङ्-लकारस्य प्रयोगः विधीयते। एते द्वे अवस्थे विहाय अन्यत्र सर्वत्र भूतकालम् दर्शयितुम् अनेन सूत्रेण लुङ्-लकारः विधीयते ।

---

231 अ ध्या 3.4.1
232 अ ध्या 3.4.3
233 अ ध्या ३.१.१
234 तत्रैव ३.१.२
235 तत्रैव ३.१.३
236 तत्रैव ३.१.९१
237 तत्रैव ३.२.८४
238 अ ध्या ३.१.१
239 तत्रैव ३.१.२
240 तत्रैव ३.१.३
241 तत्रैव ३.१.९१
242 तत्रैव ३.२.८४
243 अ ध्या 3.2.115
244 अ ध्या 3.2.111

**<u>पुरि लुङ् चास्मे (3.2.122)</u>**

पुराशब्दस्य सप्तम्येकवचनान्तं रूपं पुरि इति भवति। लुङ् प्रथमैकवचनान्तं पदम्। च इति अव्ययम्। न स्म इति अस्म, तस्मिन् अस्मे इति सप्तम्येकवचनान्तं पदम्। अत्र अनद्यतनम् इति मण्डूकप्लुत्याऽनुवर्तते। अत्र **प्रत्ययः** [245] **परश्च**[246] **आद्युदात्तश्च** [247] **धातोः**[248] **भूते** [249] इत्येतानि अधिक्रियन्ते। अत्र सूत्रे चकाराद् **लट् स्मे** [250] इत्यतः लट् इति, **नन्वोर्विभाषा** [251] इति सूत्रात् विभाषा इति पदं अनुवर्तेते।

भूतानद्यतने पुराशब्दयोगे धातोः परः विभाषया लुङ् चाल्लट् भवति न तु स्मयोगे।

**अवात्सुरिह पुरा छात्राः**, इति वाक्ययोः सर्वत्र पुराशब्दयोगाद् वस निवासे इति धातोः लुङि अवात्सुः इति रूपं भवति। यदा विभाषया सूत्रस्य प्रवृतिर्न भवति तदा लङि **अवसन्निह पुरा छात्राः** इति वाक्यप्रयोगः , तथा च परोक्षार्थे लिटि **ऊषुरिह पुरा छात्राः** इति वाक्यव्यवहारः।

**<u>माङि लुङि (3.3.175)</u>**

माङ् इति अस्य समावेशः स्वरादिगणे क्रियते अतः इदम् अव्ययम्। निषेधम् दर्शयितुम् अस्य प्रयोगः क्रियते । सूत्रे माङि इति सप्तम्यन्तं पदम्। लुङि इति सप्तम्यन्तं पदम्। अत्र **प्रत्ययः** [252] **परश्च**[253] **आद्युदात्तश्च** [254] **धातोः**[255] **भूते** [256] इत्येतानि अधिक्रियन्ते।

माङ् इत्यस्य अव्ययस्य प्रयोगे लुङ्लकारस्यैव प्रयोगः भवति ।

यथा - **मा कार्षीत्** इत्यत्र माङ् इति अव्यययोगात् प्रकृतसूत्रेण सर्वलकारापवादत्वेन लुङि डुकृञ् करणे इति धातोः कार्षीत् इति प्रयोगो भवति। तथा च लुङ्लकारस्य विषये सामान्यरूपेण यः अडागमाडागमौ विधीयेते, तौ अपि **न माङ्योगे** [257] इत्यनेन माङ्-अव्ययस्य उपस्थितौ न भवतः।

माङ्-इत्यत्र ङकारस्य इत्संज्ञायां लोपे च मा इति रूपेण अवशिष्यते। मा इत्येपि अन्यत् एकम् अव्ययम् अस्ति। सोऽपि निषेधार्थे एव प्रयुज्यते। परन्तु अस्य प्रयोगे कालानुसारं प्रयोगः भवति। यथा - **मा कुरु । मा लिखतु । मा गच्छ** ।

---

245 अ ध्या ३.१.१
246 तत्रैव ३.१.२
247 तत्रैव ३.१.३
248 तत्रैव ३.१.९१
249 तत्रैव ३.२.८४
250 तत्रैव ३.२.११८
251 तत्रैव ३.२.१२१
252 अ ध्या ३.१.१
253 तत्रैव ३.१.२
254 तत्रैव ३.१.३
255 तत्रैव ३.१.९१
256 तत्रैव ३.२.८४
257 तत्रैव **6.4.74**

**<u>स्मोत्तरे लङ् च (3.3.176)</u>**

स्म उत्तरः यस्मात् तत् स्मोत्तरम्, तस्मिन् स्मोत्तरे इति सप्तम्येकवचनान्तं पदम्। , लङ् इति प्रथमैकवचनान्तं पदम्। च इति अव्ययम्। अत्र **माङि लुङ्**[258] इत्यतः लुङ् इति प्रथमैकवचनान्तं, माङि इति सप्तम्येकवचानान्तञ्च पदमनुवर्तेते। अत्र **प्रत्ययः** [259] **परश्च**[260] **आद्युदात्तश्च** [261] **धातोः**[262] **भूते** [263] इत्येतानि अधिक्रियन्ते।

स्म यस्मात् परः अस्ति तादृशस्य माङ् अव्ययस्य विषये लुङ्लकारस्य लङ्लकारस्य वा प्रयोगः भवति।

स्म तथा माङ् एते द्वे अव्यये स्तः। माङ्-अव्ययस्य प्रयोगः निषेधार्थम् भवति, तथा स्म इत्यस्य प्रयोगः किल खलु सत्यम् निश्चयेन वा इति अस्मिन् अर्थे भवति। माङ् अव्ययस्य उपस्थितौ धातोः **माङि लुङ्**[264] इत्यनेन केवलं लुङ्-लकारः एव विधीयते। परन्तु, अस्मात् माङ्-अव्ययात् अनन्तरम् स्म अव्ययम् अस्ति चेत् लङ्लकारस्यापि प्रयोगः भवितुम् अर्हति।

यथा - **मा स्म कार्षीत् मा स्म करोत्** इति।

व्याख्या पूर्ववद्।

**<u>आशंसायां भूतवच्च (3.3.132)</u>**

आशंसनम् आशंसा। अप्राप्तस्य प्रियार्थस्य प्राप्तुम् इच्छा इति तदर्थः। आशंसायाम् इति सप्तम्यन्तं पदम्। भूतेन तुल्यम् इति **तेन तुल्यं क्रिया चेद्वतिः** [265] इति सूत्रेण वतिप्रत्यये भूतवत् इति अव्ययं सिद्ध्यति। अत्र **भविष्यति गम्यादयः** [266] **इत्यतः** भविष्यति इति, **वर्तमानसामीप्ये वर्तमानवद्वा**[267] **इत्यतः** वर्तमानवत् इति वा इति च अनुवर्तन्ते। अत्र **प्रत्ययः** [268] **परश्च**[269] **आद्युदात्तश्च** [270] **धातोः**[271] **भूते** [272] इत्येतानि अधिक्रियन्ते।

आशंसायां गम्यमानायां भविष्यति काले भूतवद् वर्तमानवद्वा विकल्पेन धातोः परः प्रत्ययो भवति।

---

[258] तत्रैव **3.3.175**
259 अ ध्या ३.१.१
260 तत्रैव ३.१.२
261 तत्रैव ३.१.३
262 तत्रैव ३.१.९१
263 अ. ध्या ३.२.८४
[264] तत्रैव **3.3.175**
265 तत्रैव ५.१.११५
266 तत्रैव ३.३.३
[267] तत्रैव **(३.३.१३१)**
268 अ ध्या ३.१.१
269 तत्रैव ३.१.२
270 तत्रैव ३.१.३
271 तत्रैव ३.१.९१
272 तत्रैव ३.२.८४

**उपाध्यायश्चेदागमत् एते व्याकरणम् अध्यगीष्महि** इत्यत्र उपाध्यायागमनं व्याकरणाध्ययनं चोभयमाशंस्यमानत्वात् उभययोः धात्वोः लुङ्प्रत्ययो भवति। तेन आगमत् अध्यगीष्महि इत्येते रूपे भवतः।

प्रकृतसूत्रे भूतशब्देन सामान्यभूतमात्रमुच्यते, न तु तद्विशेषाः लिडादयः। यतो हि परिभाषा विद्यते- **सामान्यातिदेशे विशेषानतिदेश** इति। सामान्यातिदेशे च विशेषो नातिदिश्यते इति तदर्थः। यथा व्राह्मणवदस्मिन्क्षत्रिये वर्तितव्यमित्युक्ते ब्राह्मणमात्रप्रयुक्तं कार्यं गम्यते, न तु माठरादिविशेषप्रयुक्तम्, तद्वद् सूत्रे भूतशब्दोच्चारणात् परोक्षानद्यतनप्रयुक्तौ लङ्लिटौ न भवतः ।तदेव आह काशिकाकारः- **सामान्यातिदेशे विशेषानतिदेशाल् लङ्लिटौ न भवतः। इति।**

आगमिष्यति इत्यत्र आशंसा इत्यर्थः नावगम्यते अतः न भवति अस्य सूत्रस्य प्रवृतिः।

## छन्दसि लुङ्लङ्लिटः (3.3.6)

छन्दसि इत सप्तम्येकवचनान्तं पदम्। लुङ् च लङ् च लिट् च इति इतरेतरद्वन्द्वे लुङ्लङ्लिटः इति प्रथमाबहुवचनान्तं पदम्। अत्र **धातुसम्बन्धे प्रत्ययाः**[273] इत्यतो धातुसम्बन्धे इति **समुच्चयेऽन्यतरस्याम्** [274] इत्यतः अन्यतरस्याम् इति च अनुवर्तते। अत्र **प्रत्ययः** [275] **परश्च**[276] **आद्युदात्तश्च** [277] **धातोः**[278] **भूते** [279] इत्येतानि अधिक्रियन्ते।

वेदे सामान्ये भूते धातुसम्बन्धे धातोः परः लुङ्लङ्लिटः प्रत्ययाः विकल्पेन भवन्ति इति सूत्रार्थः।

लुङ्लकारे- **शकलाङ्गुष्ठको ऽकरत्। अहं तेभ्योऽकरं नमः।** इत्यादिष्वुदाहरणेषु वाक्येषु प्रकृतसूत्रेण लुङ्प्रत्ययोऽअभवत्। सूत्रे अन्यतरस्याम् इति वर्तते अतः अन्येऽपि लकारा यथायथं भवन्ति। यथा **अद्य म्रियते** इत्युदाहरणम्।

---

[273] अ ध्या **3.4.1**

[274] तत्रैव

275 अ ध्या ३.१.१

276 तत्रैव ३.१.२

277 तत्रैव ३.१.३

278 तत्रैव ३.१.९१

279 तत्रैव ३.२.८४

## तृतीयोऽध्यायःभविष्यत्कालिकलकाराः

लडादीनां विधानन्तु वर्तमाने लट् इत्यादिसूत्रैः तत्तत्काल एव भवति। एवं च कालोऽपि तेषामर्थः। तत्र कर्तृकर्मसंख्याभावकालेषु भावस्य धातुवाच्यत्वात् कर्तृकर्मसंख्याकाला एव लकाराणामर्थाः भवन्ति वैयाकरणसम्प्रदाये। यद्यपि कालः विभुः नित्यश्च, किन्तु क्रियोपाधिवशात् तस्य कालस्य त्रयः भेदाः भवन्ति। अत एवोक्तम् -

**तस्याभिन्नस्य कालस्य व्यवहारे क्रियाकृताः।**
**भेदा एवं त्रयः सिद्धाः यांल्लोको नातिवर्तते।**

अपरे कालविभागविषये वदन्ति- आदौ कालः द्विविधो भवति, अद्यतनः अनद्यतनश्च। स च भूतभविष्यवर्तमानभेदात् त्रिविधः। अनद्यतनोऽपि भूतभविष्यभेदात् द्विविधः। वर्तमानोऽपि द्विविधः, वर्तमानः वर्तमानसमीपश्चेति। व्यवहारदृष्ट्या भगवान् भर्तृहरिः कालस्यैकादशभेदं करोति। तथाहि -

**भूतपञ्चविधस्तत्र भविष्यश्च चतुर्विधः।**
**वर्तमानो द्विधा ख्यात इत्येकादश कल्पना।**

भविष्यत्कालस्य लक्षणं भवति- **वर्तमानप्रागभावप्रतियोगित्वं हि भविष्यत्वम्** इति। एवं भाविनि घटे उत्पत्स्यमाने सति घटो भविष्यतीति व्यवहारो जायते। तत्र वर्तमानो यः प्रागभावः इत्युक्ते घटप्रागभावः तत्प्रतियोगित्वं घटे वर्तते इति घटो भविष्यत्कालिकः इति व्यवहारः।

सामान्यः भविष्यत्कालः, अनद्यतनभविष्यत्कालः इति भेदेन भविष्यत्कालः द्विधा विभक्तः। भविष्यत्सामान्यत्वञ्च अद्यतनत्वानद्यतनत्वप्रकारकप्रतीत्यविषयकत्वम् इति। अयमेवार्थ **लृट् शेषे च**[280] इति शेषपदसामर्थ्याज्ज्ञायते।

## १. <u>लृट् शेषे च ३.३.१३</u>

लृट् इति प्रथमैकवचनान्तं पदम्। उक्तादन्यः शेषः, अत्र तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् [281] इति प्रागुक्तं,ततोऽन्यः शेष। शेषे इति सप्तम्येकवचनान्तं पदम्। च इति अव्ययम्। अत्र **भविष्यति गम्यादयः**[282] इति सूत्रात् भविष्यति इति पदम्, **तुमुन्ण्वुलौ क्रियार्थायाम् क्रियायाम्** [283] इत्यतः क्रियार्थायाम् इति सप्तम्येकवचनान्तं पदम्, क्रियायाम् इति सप्तम्येकवचनान्तं पदञ्च अनुवर्तन्ते। अत्र क्रियायाम् इति, क्रियार्थायाम् इति च सत्सप्तमी अस्ति। अत्र **प्रत्ययः** [284] **परश्च**[285] **आद्युदात्तश्च** [286] **धातोः**[287] इत्येतानि अधिक्रियन्ते।

भविष्यति क्रियायाम् क्रियार्थायाम्, शेषे च लृट् .

भविष्यकालं द्योतयितुम् क्रियार्थायाम् क्रियायाम्, तद्भिन्नायाम् च क्रियायाम् लृट्लकारः भवति।

यत्र एकां क्रियां कर्तुम् द्वितीया क्रिया क्रियते, तत्र या क्रिया मुख्या अस्ति तस्याः निर्देशं कर्तुम् लृट्लकारः प्रयुज्यते। यथा यदि रामः पठनक्रियार्थम् शालाम् गच्छति, तदा अत्र पठनक्रिया मुख्या अस्ति, तथा गमनक्रिया क्रियार्था क्रिया अस्ति। अस्याम् स्थितौ मुख्यक्रियायाः निर्देशः लृट्लकारेण क्रियते। यथा - रामः पठिष्यति इति

---

[280] अ ध्या **३.३.१३**
[281] अ ध्या **३.३.१०**
[282] तत्रैव **३.३.३**
[283] तत्रैव **३.३.१०**
284 तत्रैव ३.१.१
285 तत्रैव ३.१.२
286 तत्रैव ३.१.३
287 तत्रैव ३.१.९१

शालां गच्छति। एतदेव वाक्यम् **तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्** [288] इत्यनेन तुमुन्ण्वुल्प्रत्यययोः **रामः पठितुम् शालां गच्छति** उत **रामः पाठकः शालां गच्छति** इत्यपि व्यवहारः कर्तुं शक्यते।

**<u>शेषे इति पदविचारः</u>**

या क्रिया इदानीम् न आरब्धा, या च क्रियायाम् क्रियार्थायाम् इत्यनेन अपि न निर्दिश्यते, स शेषः इति नाम्ना ज्ञायते। यथा भाष्ये- **शेषश्च कः। यदन्यत् क्रियायाः क्रियार्थायाः।** इति।काशिकायां यथा **शेषः क्रियार्थौपपदादन्यः।**

प्रकृतसूत्रेण शेषे चाशेषे च लृड् विधीयते। तथा सति पूर्वसूत्रात् **तुनुन्ण्वुलौ क्रियार्थायां क्रियायाम्** इति सूत्रात् क्रियार्थायां क्रियायाम् इति अनुवर्तनं मास्तु किञ्च लृड् इत्येव सूत्रस्वरूपं भवतु। तेन सर्वत्र भविष्यति। तत्र हरदत्तस्त्वाह — **अस्वरितत्वादेव क्रियार्थायां क्रियायामिति नानुवर्तते।** तथा सति शेष एव स्यात्, अशेषे तु तुमुन्ण्वुलौ बाधकौ स्याताम् इति न वाच्यम्। यतो हि अशेषेऽपि वासरूपविधिना लृड् भविष्यति।

परन्तु भाष्यकारै शेषे पदग्रहणमिच्छति। अत आह- **सोयमेवं सिद्धे सति यत् शेषग्रहणं करोति तस्यैतत्प्रयोजनम् -योगाङ्गं यथा विज्ञायेत। सति च यौगाङ्गे योगविभागः करिष्यते।-लृट् - लृट् भवति क्रियायामुपपदे क्रियार्थायामिति। ततः शेषे। शेषे च लृड् भवति इति।**।

अनेन सूत्रेण अद्यतनानद्यतनभविष्यकालार्थम् लृट्प्रत्ययः एव विधीयते। परन्तु क्रियार्था क्रिया नास्ति चेत् अनद्यतने लुट् [289] इत्यनेन अनद्यतनभविष्यकालार्थम् अपवादत्वेन लुट्-लकारस्य विधानं कृतम् अस्ति। यथा **- सः श्वः गन्ता**। तद्विहाय सर्वत्र लृट्-लकारस्य प्रयोगः भवितुम् अर्हति। यथा - सः अद्य श्वः वा गमिष्यति।

## २. <u>अभिज्ञावचने लृट् ३.२.११२</u>

अभिज्ञा स्मृतिः, सा उच्यतेऽनेनेति अभिज्ञावचनम्, तस्मिन् अभिज्ञावचने इति सप्तम्येकवचनान्तं पदम्। लृट् इति प्रथमैकवचनान्तं पदम्। **अनद्यतने लङ्**३.[290] इत्यतः अनद्यतने इति अनुवर्तते। अत्र **प्रत्ययः** [291] **परश्च**[292] **आद्युदात्तश्च** [293] **धातोः**[294] **भूते** [295] इत्येतानि अधिक्रियन्ते।

स्मृतिबोधकपदे उपपदे सति अनद्यतनभूतार्थे लङोऽपवादत्वेन लृड् विधीयते।

**अभिजानासि देवदत्त कश्मीरेषु वत्स्यामः** इति वाक्ये अभिजानासि इति स्मृतिबोधकपदस्य उपस्थितत्वात् अनद्यतनभूतार्थे वस निवासे इति धातोः लृड्प्रत्यये वत्स्यामः इति रूपं भवति।

---

288 तत्रैव **३.३.१०**
289 तत्रैव ३.३.१५
290 तत्रैव २.१११
291 अ ध्या ३.१.१
292 तत्रैव ३.१.२
293 तत्रैव ३.१.३
294 तत्रैव ३.१.९१
295 तत्रैव ३.२.८४

अभिज्ञावचनम् इति पदस्य अभिज्ञा इति पदैकदेशस्य ग्रहणे सति अर्थात् असति वचनग्रहणे केवलमभिज्ञाशब्दे उपपदे एव प्रकृतसूत्रेण लृड् स्यात्। तद्ग्रहणे यावन्तोऽभिज्ञानवचनास्तेषु परेषु तत्प्रत्ययो भवति। यथा बुद्ध्यसे चेतयसे इति अभिज्ञावचनाः। तदेवाह काशिकाकारः- **वचनग्रहणं पर्यायार्थम्, अभिजानासि, स्मरसि, बुद्यसे, चेतयसे इति।**

### ३. न यदि ३.२.११३

न इति अव्ययम्। यदि सप्तम्येकवचनान्तं पदम्। अत्र **अनद्यतने लङ्**[296] इत्यतः अनद्यतने इति **अभिज्ञावचने लृट्** [297] इति सूत्रञ्चानुवर्तते। अत्र **प्रत्ययः** [298] **परश्च**[299] **आद्युदात्तश्च** [300] **धातोः**[301] **भूते** [302] इत्येतानि अधिक्रियन्ते।

यच्छब्दयोगे स्मृतिबोधकपदे उपपदे सति अनद्यतनभूतार्थे लृड् न भवति इति सूत्रार्थः।

सूत्रार्थविषये काशिकाकारः वदति- **यच्छब्दसहिते अभिज्ञावचन उपपदे लृट् प्रत्ययो न भवति। पूर्वेण प्राप्तः प्रतिषिद्यते**। इति

प्रकृतसूत्रेण तन्निमित्तके लृडभावे सति वाक्येषु उत्सर्गो लङ् भवति। यथा **अभिजानासि देवदत्त यत् कश्मीरेष्ववसाम** इति वाक्ये यच्छब्दयोगे अभिजानासि इति स्मृतिबोधकोपपदे सत्त्वात् अनद्यतनभूतार्थे प्रकृतसूत्रेण लृडभावात् वस निवासे इति धातोः लङि अवसाम इति प्रयोगो क्रियते।

### ४. विभाषा साकाङ्क्षे ३.२.११४

विभाषा इति प्रथमान्तं पदम्। आकाङ्क्षणम् आकाङ्क्षा, आकाङ्क्षया सह वर्तते इति साकाङ्क्षः। आकाङ्क्षा च सम्बन्धज्ञानमुच्यते, तच्चेतनावतो धर्मः, तस्मात् साकाङ्क्ष इति प्रयोक्तुर्विशेषणं विज्ञायत। काशिकाकारस्तु- **लक्ष्यलक्षणयोः सम्बन्धे प्रयोक्तुराकाङ्क्षा भवति। इति** वदति। सूत्रे साकाङ्क्षे इति सप्तम्यन्तं पदम्। अत्र **अनद्यतने लङ्** [303]इत्यतः अनद्यतने इति **अभिज्ञावचने लृट्** [304] इति सूत्रञ्चानुवर्तते। अत्र **प्रत्ययः** [305] **परश्च**[306] **आद्युदात्तश्च** [307] **धातोः**[308] **भूते** [309] इत्येतानि अधिक्रियन्ते।

---

296 तत्रैव ३.२.१११
297 तत्रैव **३.२.११२**
298 अ ध्या ३.१.१
299 तत्रैव ३.१.२
300 तत्रैव ३.१.३
301 तत्रैव ३.१.९१
302 तत्रैव ३.२.८४
303 तत्रैव ३.२.१११
304 तत्रैव **३.२.११२**
305 अ ध्या ३.१.१
306 तत्रैव ३.१.२
307 तत्रैव ३.१.३
308 तत्रैव ३.१.९१

यच्छब्दयोगे स्मृतिबोधकपदे उपपदे सति अनद्यतनभूतार्थे लृट् प्रत्ययो भवति, ज्ञाप्यज्ञाप्यकभावेन धात्वर्थश्चेद्।

काशिकाकारस्तु - **अभिज्ञावचने उपपदे यच्छब्दसहिते केवले च विभाषा लृट् प्रत्ययो भवति, साकाङ्क्षश्चेत् प्रयोक्ता। लक्ष्यलक्षणयोः सम्बन्धे प्रयोक्तुराकाङ्क्षा भवति।**

**अभिजानसि देवदत्त कश्मीरेषु वत्स्यामस्तत्र उदनं भोक्ष्यामहे इति** वाक्ये अभिजानासि इति अभिज्ञावचनं पदम्, काश्मीरवासरूपा क्रिया इति लक्षणा अस्ति, उदनंभोजनरूपा क्रिया लक्ष्या च। अतः प्रकृतसूत्रनिमित्तत्वात् वस निवास इति धातोः लृडि वत्स्यामः इति प्रयुज्यते।

**यदि खल्वपि अभिजानासि देवदत्त यत् कश्मीरेषु वत्स्यामः, यत् तत्र उदनं भोक्ष्यामहे, अभिजानसि देवदत्त यत् कश्मीरेष्ववसाम, यत् तत्र उदनम् अभुञ्ज्महि** इत्यादिष्वुदाहरणेषु वासो लक्षणं, भोजनं लक्ष्यम्, अभिजानासि इति अभिज्ञावचनात्मकं पदं विद्यते। अतः अत्र पूर्वं **अभिज्ञावचने लृट्**[310] इति सूत्रेण लृट्प्राप्ते तदपवाद्य **न यदि** [311] **इति** निषेधे प्राप्ते प्रकृतसूत्रेण पुनः लृड् विधीयते। प्रकृतसूत्रं प्राप्ते चाप्राप्ते च इति लक्षणसमन्वयात् उभयत्रविभाषा इत्युच्यते। असति हि यच्छब्दे **अभिज्ञावचने लुट्** [312] इति प्राप्ते, सति यच्छब्दे **न यदि** [313] **इति** प्रतिषेधादप्राप्ते च लृड् विधीयते।

## ५. <u>वर्तमानसामीप्ये वर्तमानवद्वा ३.३.१३१</u>

समीपम् एव सामीप्यम्, वर्तमानस्य सामीप्यमिति वर्तमानसामीप्यम् इति षष्ठीतत्पुरुषसमासः। तस्मिन् वर्तमानसामीप्ये इति सप्तम्येकवचनान्तं पदम्। वर्तमानेन तुल्यम् इति **तेन तुल्यं क्रिया चेद्वतिः** [314] इति सूत्रेण वतिप्रत्यये वर्तमानवत् इति अव्ययं सिद्ध्यति। वा अव्ययं पदम्। सूत्रेऽस्मिन् **प्रत्ययः**[315] **परश्च**[316] **आद्युदात्तश्च** [317] **धातोः**[318] इत्येतानि अधिक्रियन्ते। अत्र **यावत्पुरानिपातयोर्लट्** [319] इत्यतः लट् इति **विभाषा कदाकर्ह्योः**[320] इति च अनुवर्तते।

---

309 तत्रैव ३.२.८४
310 तत्रैव **३.२.११२**
311 तत्रैव **३.२.११३**
312 तत्रैव **३.२.११२**
313 तत्रैव **३.२.११३**
314 तत्रैव ५.१.११५
315 तत्रैव ३.१.१
316 तत्रैव ३.१.२
317 तत्रैव ३.१.३
318 अ ध्या ३.१.९
319 अ ध्या ३.३.४
320 तत्रैव ३.३.५

**वर्तमाने लट्** [321]इत्यारभ्य **उणादयो बहुलम् ३.३.१** [322]इति यावद वर्तामाने प्रत्यया उक्ताः ते वर्तमानसमीपे भूते भविष्यति च वर्तमानाद् धातोःपरः विकल्पेन भवन्ति।

वर्तमानसामीप्यञ्च वर्तमानकालानन्तरं यावत्क्षणं वर्तमानस्य संस्कारः भूते भविष्यति चानुभूयते तस्य सर्वस्यापि कालस्य वर्तमानपदेन ग्रहणं भवति। भर्तृहरिरपि प्रमाणयति -

**अध्वनो वर्तमानस्य यः शेषो य उपक्रमः।**
**तद्वर्तमानसामीप्यं शास्त्रभेदे न दर्शितम्॥**

**कदा देवदत्त गमिष्यति? अयम् गच्छामि** गमिष्यामि वा इति वर्तमानसामीप्यभूतकालस्य उदाहरणम्। **कदा गमिष्यति इति** भविष्यत्कालेन प्रश्नवाक्यम्**, आगच्छामीत्युदाहरणे** भविष्यत्कालाभिव्यक्तयेऽयमिति प्रयोगस्त्विदानीमेवागमम् इति वर्तमानसमीपभूतकालद्योतनाय। अतः उत्तरवाक्ये लट् प्रयोगः। विकल्पपक्षे तु सामान्यभविष्यत्कालिकः लृट्प्रत्ययस्य प्रयोगो भवति।

**६. <u>क्षिप्रवचने लृट् ३.३.१३३</u>**

क्षिप प्रेरणे इति धातोः **स्फायितञ्चिवञ्चीति** [323] इति उणादिसूत्रेण रक्प्रत्यये क्षिप्रम् इति शब्दो निष्पन्नः। शीघ्रमिति तदर्थः। क्षिप्रस्य वचनम् इत क्षिप्रवचनम्, तस्मिन क्षिप्रवचने इति सप्तम्यन्तं पदम्। लृट् इति प्रथमान्तं पदम्। अत्र

भूतेन तुल्यम् इति तेन तुल्यं क्रिया चेद्वतिः इति सूत्रेण वतिप्रत्यये भूतवत् इति अव्ययं सिद्ध्यति। अत्र **आशंसायां भूतवच्च** [324] इत्यतः आशंसायाम् इति सप्तम्यन्तं पदमनुवर्तते। अत्र **प्रत्ययः** [325] **परश्च**[326] **आद्युदात्तश्च** [327] **धातोः**[328] **भूते** [329] इत्येतानि अधिक्रियन्ते। आशंसायाम् इति पदसत्वात् भविष्यत्कालिकी इयमिति आक्षिप्यते।

आशंसायां गम्यमानायां भविष्यति काले क्षिप्रवचनोपपदे सति धातोः परः लृट्प्रत्ययो भवति।

उपाध्यायश्चेत् क्षिप्रम् आगमिष्यति, क्षिप्रं व्याकरणम् अध्येष्यामहे इत्यत्र उपाध्यायागमनं व्याकरणाध्ययनं चोभयमाशंस्यमानत्वात् क्षिप्रमिति क्षिप्रवचनग्रहणाच्च प्रकृतसूत्रेण उभययोः धात्वोः लुङ्प्रत्ययो भवति। तेन आगमिष्यति अध्येष्यामहे इत्येते रूपे भवतः।

---

321 तत्रैव ३.२.१२३
322 तत्रैव ३.२.१२३
323 अ ध्या **३.२.१३**
324 अ ध्या **३.३.१३२**
325 अ ध्या ३.१.१
326 तत्रैव ३.१.२
327 तत्रैव ३.१.३
328 तत्रैव ३.१.९१
329 तत्रैव ३.२.८४

क्षिप्रवचनम् इति पदस्य क्षिप्र इति पदैकदेशस्य ग्रहणे सति अर्थात् असति वचनग्रहणे केवलं क्षिप्रशब्दे उपपदे एव प्रकृतसूत्रेण लृड् स्यात्। तद्ग्रहणे यावन्तो क्षिप्रवचनास्तेषु परेषु तत्प्रत्ययो भवति। यथा क्षिप्रम्, शीघ्रम्, आशु, त्वरितम्, इत्येते अभिज्ञावचनाः। तदेवाह काशिकाकारः- **वचनग्रहणं पर्यायार्थम्। क्षिप्रम्, शीघ्रम्, आशु, त्वरितम् इति।**

क्षिप्रवचने न इत्येव सूत्रस्वरूपे सत्येव कार्ये सिद्धे लृट् ग्रहणं प्रकृतसूत्रेण क्षिप्रवचनोपपदे भूतवत् वर्तमानवच्च ये प्रत्ययाः उक्ताः तेषां बाधित्वा लृड् भवति। न शब्दयोगे सति **सामान्यातिदेशे विशेषानतिदेश** इति परिभाषया भविष्यत्सामान्ये विहितस्य लृट एव निषेधः स्यान्नतु लुटः, तस्यानद्यतनभविष्यद्विशेषविधानात्। तदेव आह काशिकाकारः- **न इति वक्तव्ये लृड्ग्रहणं लुटो ऽपि विषये यथा स्यात्। श्वः क्षिप्रम् अध्येष्यमहे।** इति

## ७. <u>किंवृत्ते लिङ्लृटौ ३.३.१४४</u>

वर्ततेऽस्मिन्निति विग्रहे **क्तोऽधिकरणे च** इत्यधिकरणे क्तप्रत्यये वृतम् इति शब्दः निष्पन्नः। किमः वृत्तं इति किंवृत्तम्। किम् इत्यस्माद् यानि रूपाणि भवन्ति तेषां ग्रहणं किंवृत्तम् इति पदेन भवति। एतद्विषये आह पदमञ्जरीकारः- **यत्र किंशब्दोऽवयवत्वेन वर्तते तत्सर्वं किंवृतम् इति।** तस्मिन् किंवृत्ते इति सप्तम्येकवचनान्तं पदम्। किमेतच्छब्दरूपं विभक्त्यन्तं वृत्तग्रहणेन प्रतीयते। तेन **किंयत्तदौर्निर्धारणे द्वयोरेकस्य डतरच्** [330] इत्यनेन, **वा बहूनां जातिपरिप्रश्ने डतमच्** [331] इत्यनेन च यथाक्रमं इत्येतौ डतरडतमौ प्रत्ययौ किंशब्दसम्बन्धिनावेव वृत्तग्रहणेन प्रतीयते। लिङ् च लृट् च इति इतरेतरद्वन्द्वे लिङ्लिटौ इति प्रथमान्तं पदम्। अत्र **गर्हायां लडपिजात्वोः**[332] इत्यतः गर्हायाम् इति सप्तम्यन्तं पदमनुवर्तते। गर्ह्यते निन्द्यते इति गर्ह कुत्सने इति धातो **गुरोश्च हलः**[333] इति स्त्रियाम् अप्रत्यये ततः टापि गर्हा इति सिद्ध्यति। निन्दा इति तदर्थः। अत्र **प्रत्ययः** [334] **परश्च** [335] **आद्युदात्तश्च** [336] **धातोः** [337] इत्येतानि अधिक्रियन्ते।

गर्हायां गम्यमानायाम् किंवृत्तयोगे धातोः परः लिङ्लृटौ प्रत्ययौ भवतः।

**को नाम वृषलो यं तत्रभवान् याजयेत्, यं तत्रभवान् वृषलं याजयिष्यति। कतरो नाम, कतमो नाम यां तत्रभवान् वृषलं याजयेत्, याजयिष्यति** इत्यदिषु उदाहरणेषु ताच्छील्यप्रतिपादनेनात्र गर्हा ज्ञायते, अपि च किंवृत्तानां योगो वर्तते। अतः प्रकृतसूत्रेण लिङ्लृटौ प्रत्ययौ भवतः।

## ८. <u>अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि ३.३.१४५</u>

---

330 अ ध्या ५.३.९२
331 तत्रैव ५.३.९३
332 तत्रैव **३.३.१४२**
333 अ. ध्या ३.३.१३
334 तत्रैव ३.१.१
335 तत्रैव ३.१.२
336 तत्रैव ३.१.३
337 तत्रैव ३.१.९१

किमो वृत्तं किंवृत्तं, न किंवृत्तमकिंवृत्तं, तस्मिन् अकिंवृत्ते, षष्ठीतत्पुरुषगर्भनञ्तत्पुरुषः। किम् इत्यस्माद् यानि रूपाणि भवन्ति तेषां ग्रहणं किंवृत्तम् इति पदेन भवति। एतद्विषये आह पदमञ्जरीकारः- **यत्र किंशब्दोऽवयवत्वेन वर्तते तत्सर्वं किंवृतम् इति।** अवक्लृप्तिः सम्भवना, न अवक्लृप्तिरनवक्लृप्तिः, नञ्तत्पुरुषः। मर्षः क्षमा, न मर्षोऽमर्षः, नञ्तत्पुरुषः। अनवक्लृप्तिश्च अमर्षश्च तयोरितरेतरयोगद्वन्द्वः अनवक्लृप्त्यमर्षौ, तयोरनवक्लृप्त्यर्षयोः। अनवक्लृप्त्यमर्षयोः सप्तम्यन्तं पदम्। अकिंवृत्ते सप्तम्यन्तम्, अपि इत्यव्ययम्। अत्र **किंवृत्ते लिङ्लृटौ** [338] इत्यतः लिङ्लृटौ इति अनुवर्तते। अत्र **प्रत्ययः** [339] **परश्च** [340] **आद्युदात्तश्च** [341] **धातोः** [342] इत्येतानि अधिक्रियन्ते।

सति असति च किंवृत्ते उपपदे अनवक्लृप्त्यमर्षयोः गम्यमानयोः सत्योः धातोः कालसामान्ये अर्थे सर्वलकाराणाम् अपवादत्वेन लिङ्लृटौ प्रत्ययौ भवतः।

**अनवक्लृप्तौ तावत् न अवकल्पयामि, न सम्भावयामि, न श्रद्दधे तत्रभवान् नाम वृषलं याजयेत्, तत्रभवान् नाम वृषलं याजयिष्यति** इत्यत्र अनवक्लृप्तौ इति, किंवृत्तम्, अकिंवृत्तम् च उपपदसत्वात् प्रकृतसूत्रेण यज पूजासंगतिकरणदानेषु इति धातोः लिङ्लृटौ प्रत्ययौ भवतः। तथैव **अमर्षे न मर्षयामि तत्रभवान् वृषलं याजयेत्, याजयिष्यति। को नाम वृषलो यं तत्रभवान् याजयेत्, याजयिष्यति** इत्यत्र अमर्षपदयोगे पूर्ववत्प्रक्रिया।

**अनवक्लृप्त्यमर्षयोः इति पदविचारः**

अनवक्लृप्तिश्च अमर्षश्च अनवक्लृप्त्यमर्षौ इति इतरेतरद्वन्द्वे विद्यमानः अमर्षशब्दो अनवक्लप्तिशब्दापेक्षयाल्पाच्तरोऽस्ति। अतः समस्तपदे **अल्पाच्तरम्** [343] इति सूत्रेण तस्य पूर्वनिपातो कर्तव्यः। परन्तु तदकृत्वा अत्र वह्वचोऽनवुक्लृप्तिशब्दस्य पूर्वनिपातः कृतः। तेन लक्षणव्यभिचारार्थतां दर्शयति।

**अपि पदविचारः**

यथेह पूर्वनिपातलक्षणं व्यभिचारात् स्वविषये न प्रवर्तते, तथैव यथासंख्यं लक्षणम् अपीति, तेन यथासंख्यं न भवति। अपिग्रहणं किंवृत्तेऽपि यथा स्यात्। यतो हि अपि ग्रहणाभावे अकिंवृत्ते इति पदग्रहणे केवलं अकिंवृत्ते एव स्यात्। **उपकादिभ्योऽन्यतरस्याम्** [344] इत्यत्राद्वन्द्वग्रहणं द्वन्द्वाधिकारनिवृत्त्यर्थं कृतमस्ति। तथेहाप्यकिंवृत्तग्रहणं किंवृत्ताधिकारनिवृत्त्यर्थं स्यात्, तथा च तस्मिन्निवृत्ते किंवृत्तेऽकिंवृत्ते प्रत्ययद्वयं भविष्यतीति व्याख्यायते, तदा अपि ग्रहणं शक्यतेऽकर्तुम्।

## ९. किंकिलास्त्यर्थेषु लृट् ३.३१४६

---

[338] अ ध्या **३.३.१४४**

339 तत्रैव ३.१.१

340 तत्रैव ३.१.२

341 तत्रैव ३.१.३

342 तत्रैव ३.१.९१

[343]अ ध्या **२.२.३४**

[344] तत्रैव **२.४.६९**

अस्ति अर्थो येषां ते अस्त्यर्थाः। सत्ता इति तदर्थः। ते च यथा अस्ति भवति विद्यते इति। किंकिलशब्दः समुदाय एव। स च शब्दः क्रोधद्योतकः। समुदायादेव क्रोधद्योकत्वात् न तस्य पृथक् उपपदत्वेन व्यवहारः क्रियते। किंकिलश्च अस्त्यर्थाश्च इति इतरेतरद्वन्द्वे किंकिलास्त्यार्थाः, तेषु किंकिलास्त्यार्थेषु इति सूत्रे इदं सप्तम्यन्तं पदम्। लृट् इति प्रथमान्तं पदम्। **अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि** [345] इत्यतः अत्र अनवक्लृप्त्यमर्षयोः इति अनुवर्तते। अत्र **प्रत्ययः** [346] **परश्च** [347] **आद्युदात्तश्च** [348] **धातोः** [349] इत्येतानि अधिक्रियन्ते।

किंकिलास्त्यार्थेषु उपपदे अनवक्लृप्त्यमर्षयोः गम्यमानयोः सत्योः धातोः परः लिङोऽपवादत्वेन लृट् प्रत्ययो भवति।

**किंकिल नाम तत्र भवन् वृषलं याजयिष्यति** इत्यत्र किंकिल इति उपपदे अस्ति, अतः प्रकृतसूत्रेण लृटि याजयिष्यति इति रूपं भवति। भवत्कर्तृकं वृषलयाजनमस्तीत्यर्थको **अस्ति नाम तत्रभवान् वृषलं याजयिष्यति** इत्यत्र उदाहरणे अस्ति इति उपपदसत्वात्,तेन मर्षरूपार्थस्य अवगमाच्च प्रकृतसूत्रेण लृट् विधीयते। **भवति नाम तत्रभवान् वृषलं याजयिष्यति। विद्यते नाम तत्रभवान् वृषलं याजयिष्यति** इत्यादौ भवति विद्यते इति द्वौ अस्त्यर्थकौ। अतः पूर्ववद्विधानम्।

### **१०.शेषे लृडयदौ ३.३.१५१**

उक्तादन्यः इति शेषः इति परिभाषावलाद् आकांक्षा जायते क उक्तः इति। तदाह **यच्चयत्रयोः** [350] इति सूत्रेण यच्चयत्रौ अव्ययौ उक्तौ। तदन्यः अव्ययः अत्र गृह्यते। शेषे इति सप्तम्यन्तं पदम्। लृट् इति प्रथमान्तं पदम्। न यदि इति अयदि इति नञ्तत्पुरुषः। अत्र नञर्थः पर्युदासः। तेन **तद्भिन्नतत्सादृशः पर्युदासः** इति लक्षणवलात् अन्ये अव्यये गृह्यन्ते। सूत्रे अयदौ इति सप्तम्यन्तं पदम्। अत्र **चित्रीकरणे च** [351] इत्यतः चित्रीकरणे इति सप्तम्यन्तं पदमनुवर्तते। अस्य पदस्य अर्थः आश्चर्यम् इति। अत्र **प्रत्ययः** [352] **परश्च** [353] **आद्युदात्तश्च** [354] **धातोः** [355] इत्येतानि अधिक्रियन्ते।

अयदौ परतः शेषे अर्थात् यच्चयत्रभिन्ने उपपदे चित्रीकरणार्थे गम्यमाने धातोः परः सर्वलकारापवादत्वेन लृट् प्रत्ययो भवति इति सूत्रार्थः।

---

345 तत्रैव **३.३.१४५**
346 तत्रैव ३.१.१
347 तत्रैव ३.१.२
348 तत्रैव ३.१.३
349 तत्रैव ३.१.९१
350 अ ध्या **३.३.१४८**
351 तत्रैव **३.३.१५०**
352 तत्रैव ३.१.१
353 तत्रैव ३.१.२
354 तत्रैव ३.१.३
355 तत्रैव ३.१.९१

**आश्चर्यम् चित्रम् अद्भुतम्, अन्धो नाम पर्वतमारोक्ष्यति, बधिरो नाम व्याकरनमध्येष्यते** इति वाक्यभिः चित्रीकरणार्थोऽवगम्यते, तथा च यदि यच्च यत्र इति एते शब्दा अपि न प्रयुक्ताः। अतः प्रकृतसूत्रेण लृट्प्रत्ययो भवति।

**आश्चर्यं यदि स भुञ्जीत, यदि सोऽधीयीत** इति वाक्ये अनवक्लृप्रेरत्राश्चर्यत्वं गम्यते अवगमनेऽपि यदि इति शब्दस्य प्रयोगात् प्रकृतसूत्रस्य प्रवृत्तिर्न भवति। अतः **जातुयदोर्लिङविधाने यदायद्योरूपसंख्यानम् वा।**[356] इति वार्तिकेन अनवक्लृप्तौ लिङ्प्रत्ययो विधीयते।

अद्यतनः अनद्यतनश्च इति द्विविधः कालो भवति। स च भूतभविष्यवर्तमानभेदात् त्रिविधः। तत्रापि अनद्यतनो भूतभविष्यभेदात् द्विविधः। अतः अनद्यतने भविष्यत्कालीकः लकारः विमर्शते।

**११.अनद्यतने लुट् ३.३.१५**

अविद्यमानोऽद्यतनो यस्मिन्निति सोऽनद्यतन इति बहुव्रीहिः। तस्मिन् अनद्यतने इति सप्तम्येकवचनान्तं पदम्। लुट् इति प्रथमान्तं पदम्। अत्र **भविष्यति गम्यादयः** [357] इति सूत्रात् भविष्यति इति पदमनुवर्तते। अत्र **प्रत्ययः** [358] **परश्च**[359] **आद्युदात्तश्च** [360] **धातोः**[361] इत्येतानि अधिक्रियन्ते।

अनद्यतन-भविष्यकालं द्योतयितुम् धातोः परः लुट्-लकारः प्रयुज्यते। इति सूत्रार्थः।

**सः श्वः विद्यालयं गन्ता। अहं अग्रिमसप्ताहे व्याकरणम् पठितास्मि। ते अग्रिमवर्षे स्नातकाः भवितारः** इत्येतान्युदाहरणानि।

**अनाद्यतन पदविचारः**

न अद्यतनः इति अनद्यतनः इति यद्ययं तत्पुरुषः स्यात् तदा नञर्थः पर्युदासो वा स्यात्, प्रसज्यप्रतिषेधो वा। तदा पर्युदासपक्षे अद्यतनः इत्यस्य द्योऽन्यस्तस्मिन् इति विग्रहो भवति। तथा सति **अद्य श्वो वा भविष्यति** इत्यत्राप्यद्यतनव्यामिश्रे प्रकृतसूत्रेण विधिर्प्राप्नोति। अद्यतनानद्यतनसमुदायोऽनद्यतनादन्यः अस्ति। प्रसज्यप्रतिषेधपक्षे तु अद्यतने न भवतीत्येषोऽर्थो जायते। तथा सति भविष्यत्सामान्ये एव प्रत्ययो स्यात्। अनद्यतन इति अद्यतनभविष्यत्विशेषे प्रतिषेधः,न भविष्यत्सामान्ये। यतो हि भविष्यत्सामान्यं न भविष्यत्विशेषो भवति। अपि च सूत्रमिदं व्यर्थं स्यात्। **लृट् शेषे च** [362] इत्यनेन भविष्यत्सामान्ये लृट्विधानात्। तस्मात् तत्पुरुषपक्षस्य दोषयुक्तत्वात् अनद्यतन इत्यत्र बहुव्रीहिनिर्देशः कृतः इति। अनद्यतने इति बहुव्रीहिनिर्देशात् यत्राद्यतनगन्धोऽप्यस्ति

---

[356] अ ध्या **३३१**

[357] तत्रैव **३.३.३**

358 तत्रैव ३.१.१

359 तत्रैव ३.१.२

360 तत्रैव ३.१.३

361 तत्रैव ३.१.९१

[362] अ ध्या **३.३.१३**

तत्र लुडा न भवितव्यमित्येषः अर्थो लभ्यते। अतः **अद्य श्वो वा भविष्यति** इत्यस्मिन् उदाहरणे अद्य इति पदयोगात् लुट्-लकारो न विधीयते।

सूत्रमेतत् लृट् शेषे च [363] इत्यस्य अपवादरूपेण आगच्छति। लृट्-शेषे च इत्यनेन शुद्धभविष्यकालार्थं सर्वत्र लृट्-प्रत्ययः विधीयते। तस्य बाधकरूपेण अनेन सूत्रेण अनद्यतनभविष्यकालार्थम् लुट्-लकारः पाठ्यते। अतः यदि क्रियायाः "अनद्यनत्वम्" वाक्ये स्पष्टम् अस्ति, तर्हि लुट्-लकारस्यैव प्रयोगः करणीयः, लृट्-लकारस्य न। अतः "सः श्वः विद्यालयं गमिष्यति" इति वाक्यम् व्याकरणदृष्ट्या असाधु अस्ति। यत्र कालः स्पष्टः नास्ति, तत्र तु लृट्-लकारः एव प्रयोक्तव्यः। यथा - सः विद्यालयं गमिष्यति। सः अद्य श्वः वा विद्यालयं गमिष्यति।

# चतुर्थोऽध्यायः विध्यर्थकलकाराः

## लिङ् लकाराः

### १. विधिनिमन्त्रणामन्त्रणाधिष्टसम्प्रश्नप्रार्थनेषु लिङ् ३.३.१६२

विधिश्च निमन्त्रणश्च आमन्त्रणश्च अधीष्टश्च सम्प्रश्नश्च प्रार्थनाञ्च इति इतरेतरद्वन्द्वे विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनानि, तेषु विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु इति सप्तमीबहुवचनान्तं पदम्। लिङ् इति प्रथमैकवचनान्तं पदम्। सूत्रेऽस्मिन् **प्रत्ययः**[364] **परश्च**[365] **आद्युदात्तश्च** [366] **धातोः**[367] इत्येतानि अधिक्रियन्ते।

विधिः, निमन्त्रणम्, आमन्त्रणम्, अधीष्टम्, सम्प्रश्नः, प्रार्थना इत्येतेषु अर्थेषु धातोः परः आद्युदात्तः लिङ्प्रत्ययः भवतीति सूत्रार्थः।

अनेन सूत्रेण लिङ्लकारस्य विधानम् क्रियते। लिङ्लकारस्य प्रयोगः सामान्यरूपेण प्रवर्तनायाम् क्रियते। प्रवर्तना अर्थात् केनापि कथं कार्यं क्रियेत अस्मिन् विषये कृतं बोधनम्। एतत् बोधनम् अनेन सूत्रेण षट्सु अवस्थासु विभाजितम् अस्ति विधिः, निमन्त्रणम्, आमन्त्रणम्, अधीष्टम्, सम्प्रश्नः, तथा प्रार्थना। तच्च यथा

---

[363] अ ध्या ३.३.१३
[364] अ ध्या **३.१.१**
[365] **तत्रैव ३.१.२**
[366] तत्रैव **३.१.३**
[367] तत्रैव **३.१.९१**

**विधिः** अर्थात् प्रेरणा आज्ञा वा। सामान्यरूपेण भृत्यम् सेवकं प्रति यादृशः व्यवहारः क्रियते, तादृशं व्यवहारम् दर्शयितुम् लिङ्लकारः प्रयुज्यते। यथा राजा सेवकं ब्रूते वस्त्रं क्षालयेः।

**निमन्त्रणम्** अर्थात् श्राद्धभोजनादिषु दौहित्रादेः प्रवर्तनम्। यथा इह श्राद्धे भवान् भुञ्जीत। निमन्त्रणस्य स्वीकारः एव कर्तव्यः, तस्य अस्वीकारं न कर्तुं शक्यते।

**आमन्त्रणम्** अर्थात् कामचारानुज्ञा। यथा यथेच्छम् इह भवान् भुञ्जीत। आमन्त्रणस्य स्वीकारः अपि कर्तुं शक्यते, अस्वीकारः अपि कर्तुं शक्यते, अत यथेच्छम् इति प्रयुक्तम् अस्ति।

**अधीष्टम्** इति सत्कारपूर्वकः व्यापारः अर्थात् धनादिं दत्त्वा व्यापारः। यथा मम पुत्रम् अध्यापयेत् भवान्!।

**सम्प्रश्नः** अर्थात् कर्तव्याकर्तव्यविषयकः प्रश्नः। यथा किम् सः व्याकरणम् पठेत् ?

**प्रार्थना** अर्थात् याचना। यथा भवान् मे अन्नं दद्यात्।

एतेषु षट्सु अर्थेषु लिङ्लकारस्य प्रयोगः अनेन सूत्रेण दीयते। एतेषु अर्थेषु यः लिङ्लकारः प्रयुज्यते, तस्य निर्देशः विधिलिङ्लकारः इति नाम्ना व्यवहारः।

## लिङर्थविचारः

एतच्छीर्षकं दृष्ट्वा संशयोऽयमवश्यं बाधेत यत् इदानीमेव खलु विधिनिमन्त्रणादिसूत्रबलात् लिङोऽर्थः निरूपितः। पुनः लिङर्थः इति कथनस्य को वा अभिप्रायस्स्यात् इति। एतावता पूर्वमुक्तं तु वैयाकरणमतं नास्तीति वा तत्र दोषा आसन्निति वा न भ्रमितव्यम्। पूर्वं तु स्थूलतया सूत्रस्य अक्षरमर्यादया लब्धमर्थमादाय लिङ वर्णितः। इदानीं तु तद्विषये एव सूक्ष्मतया विचारं कृत्वा निष्कर्षः प्रदर्श्यते।

## व्याकरणमतम्

वैयाकरणास्तु विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ' इति सूत्रेण विध्यादिषु लिङविधानेन लोके तादृशप्रतीतेः सत्वाच्च विध्यादिरेव लिङर्थ इति स्वीकुर्वन्ति। तथा चोक्तं परमलघुमजूषायाम् –

**लिङादेशस्य विध्यादिरर्थः** इति।

तत्र **विधिः** प्रवर्तनम्, प्रेषणमिति। तच्च निकृष्टस्य भृत्यादेः प्रवर्तनमेव विधिः। यद्विषयकत्वेन ज्ञानस्य प्रवृत्तिजनकत्वं सैव प्रवर्तना। यथा स्वर्गकामो यजेत" स्वर्गकामाभिन्नकर्तृकयागभावना स्वर्गादीष्टसाधनता वैयाकरणमते बोधसत्वात् भावनायामिष्टसाधनत्वमेव विधिरिति वैदिकोदाहरणम्। लौकिकोदाहरणन्तु जलमाहर, जलकर्मकमाहरणमिष्टसाधनमिति बोधे आहरणगतेष्टसाधनमेव विधिः।

**निमन्त्रणं** नियोगकरणम्, आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम्। विप्रं निमन्त्रयते इत्यादौ विप्राश्रयवृत्तिप्रवृत्तिजनकव्यापारबोधदर्शनात् प्रवृत्तिजनकव्यापार एव निमन्त्रणम्।

**आमन्त्रणम्** कामचारानुज्ञा। काम: इच्छा तेन चरति प्रवर्तते इति कामचार: अर्थात् स्वेच्छया प्रवृत्तिस्वभावः, तस्यानुमतिः अनुज्ञेति। अथवा इच्छयाऽचरणः कामचारः। अत एवात्र दर्पणकारो ब्रूते **स्वेच्छया प्रवृत्तस्येतरत्रप्रवृत्ति" इति**। अत्र प्रवर्तना प्रतीयमाना भवति। निमन्त्रणामन्त्रणयोर्भेदं प्रतिपादयता पतञ्जलिनोक्तम् **आमन्त्रणे कामचारः** इति। यत्र भोजनाद्यननुष्ठानेऽपि न प्रत्यवायस्तद्विषया प्रवर्तना एव आमन्त्रणमिति भावः। कौण्डभटेनापि तथैव व्याख्यातम् ''**आमन्त्रणं कामचारानुज्ञा"** इति।

**अधीष्टः_**अधीष्टार्थेऽपि लिङ्लकारो भवति, अतः अधीष्टोऽपि लिङर्थः सत्कारपूर्वको व्यापारः अधीष्टः, अध्ययनादिव्यापारे सम्मानपूर्वकप्रवृत्यनुकूलो व्यापार इत्यर्थः। यथा माणवकमध्यापयेत् भवान् अत्रापि प्रवृत्तिजनकव्यापाररुपा प्रवर्तना प्रतीयते।

**सम्प्रश्नः** सम्प्रश्न: सम्प्रधारणम्। इदं वा कर्तव्यं तद्वा कर्तव्यमित्येवं विचारः एव सम्प्रश्नः। उपस्थितयोः क्रिययोर्मध्ये एकतरक्रियाधर्मिकेष्टसाधनत्वेच्छानिर्णयः। यथा कि भो वेदं वाधीयीत उत तक्रम् इति। स्वोदेश्यकत्वसम्बन्धेन सम्बोध्यविशिष्टमन्निष्ठा च वेदाध्ययनतर्काध्ययनान्यतरभावेन इष्टसाधनत्वप्रकारकनिर्णयेच्छाविषय इति बोधः। एवंरीत्या एषु लिङ्लकारो भवति।

तत्र विधिर्नाम प्रेरणम्। निमन्त्रणं नाम यद्यपि नियोगकरणं, तथापि तत्रापि भोजने कर्मणि प्रेरणं तावत् अन्तर्भूतमस्ति। एवं अधीष्टः सत्कारपूर्वको व्यापार इति अध्यापकं सत्कृत्य अध्यापने कर्मणि प्रेरयतीति सर्वत्र अनुगततया प्रेरणात्वं वर्तते एव। अर्थात् यद्यपि लिङविधायकसूत्रे षण्णामर्थानामुपादानमस्ति किन्त्वाद्येषु चतुर्षु प्रवर्तना प्रवृत्तिजनकव्यापारोऽनुस्यूतः तस्मात् चतुर्षु प्रवर्तना विद्यत एव। तस्मात् भिन्नभिन्नेषु अर्थेषु शक्तिकल्पनापेक्षया लाघवात् अनुगतैकधर्मावच्छिन्ने शक्तिकल्पनं वरम्। तस्मात् सूत्रोक्तेषु सर्वेष्वपि अर्थेषु प्रवर्तनात्वमिति अनुगतो धर्मो वर्तते। तदवच्छिन्ने एव लिङः शक्तिः इति वैयाकरणमतम्। अर्थात् **प्रवर्तनायां लिङ्** इत्येव स्यात् तर्हि शक्यतावच्छेदकं प्रवर्तनात्वमेकविधं स्यादितिमहल्लाघवं स्यात्। अपितु नानाशक्यतावच्छेदके नानात्वप्रसङ्ग आपद्यते। एतावता न सूत्रविरोधः। सूत्रोक्तार्थ एव अनुगतधर्ममादाय स्वीकृतः। अत एव कौण्डभट्टः वर्णयति एतच्चतुष्टयानुगतप्रवर्तनात्वेन वाच्यता लाघवात्। यथा भूषणसारे

**अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि।**
**तत्रैव लिङ्विधातव्यः किं भेदस्य विवक्षया।**
**न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा।**
**विद्ध्यादीनामुपाधानम चतुर्ण्णामादितः कृतम्।।**[368]

कारिकाया अयमर्थः। चतुर्ष्वपि अर्थात् सूत्रोक्तेषु चतुर्ष्वपि अर्थेषु विध्यादिषु, प्रवर्तनारूपं अर्थात् प्रवर्तनायाः रूपं प्रवर्तनात्वरूपो धर्मः, अनुस्यूतमस्ति अर्थात् अनुगतमस्ति। तत्रैव अर्थात् अनुगतधर्मावच्छिन्ने प्रवर्तनात्वावच्छिन्ने एव, लिङ् विधातव्यः। किं भेदस्य विवक्षया अर्थात् विधिः, निमन्त्रमिति भेदस्य विवक्षया किं प्रयोजनमिति प्रथमायाः कारिकायाः अर्थः। तर्हि तथैव सूत्रकृता कुतो नोक्तमित्याशङ्कायां द्वितीयया कारिकया परिहरति

---

[368] दर्पनव्याख्या पृष्ठं- 133

न्यायव्युत्पादनार्थं वेति। एवं रीत्या प्रवर्तना बहुविधा भवतीति व्युत्पादनार्थं वा स्पष्टप्रतिपत्त्यर्थं वा विध्यादीनां पृथगुपादानं सूत्रकृता कृतमिति द्वितीयकारिकार्थः।

एकया प्रवर्तनयैव सर्वं सेत्स्यति, किमर्थं पृथक् पृथगर्थेषु लिङ्् विधीयत इति प्रश्ने द्वितीयकारिकायां पक्षद्वयमुपस्थापितम्। तच्च-

१. न्यायव्युत्पादनार्थम्

२. प्रपञ्चार्थम्

न्यायो नाम व्युत्पत्तिः तज्ज्ञानार्थमेव चतुर्णां पृथग् पृथग् उपादानम्। अथवा शिष्यबुद्धिवैशद्यार्थमेव पृथगुपादानमिति भावः। अत्र नागेशाभिमतिः विद्यते, कैयटोऽपि तत्रैव प्रतिपादयति प्रपञ्चार्थं न्यायव्युत्पादनार्थमिति भेदमाश्रित्य चतुर्णामुपादानम्। प्रपञ्चार्थमित्यस्य विवरणं पञ्चोलिना कृतं विस्तरेण ज्ञानार्थम्। एवञ्च प्रवर्तनात्वेन विध्यादीनां वाच्यतेति वैयाकरणसिद्धान्तः।।

**प्रवर्तनात्वञ्च –**

प्रवर्तनात्वावच्छिन्नमेव लिङ्वाच्यमिति वैयाकरणमतम्। तत्र किं नाम प्रवर्तनात्वमिति चेत् **प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वम्** इति आह। प्रवृत्तिजनकं यत्ज्ञानम् इदं मदिष्टसाधनमिति ज्ञानम्। इष्टसाधनताज्ञानमेव सर्वत्र प्रवृत्तिजनको भवति। अन्यथा प्रवृत्तिविषयधर्मिकस्य इष्टसाधनत्वप्रकारकस्य ज्ञानस्य अभावे प्रेरणारूपे व्यापारे सत्यपि प्रवृत्तिर्न जायते। अर्थात् प्रयोजकवाक्यं श्रुत्वा प्रयोज्यजनस्य व्यवहारं दृष्ट्वैव समीपस्थः बालः स्वप्रवृत्तिसाधनेन प्रथममिष्टसाधनताज्ञानमनुमिनोति। तादृशानुमीयमानज्ञानस्य कारणं लिङादिघटितं वाक्यमेव। अतः प्रवृत्तिजनकज्ञानम् इष्टसाधनताज्ञानं, तद्विषयः इष्टसाधनं, विषयतावच्छेदकं इष्टसाधनत्वमिति तदेव प्रवर्तनाशब्देन ग्राह्यमिति वैयाकरणमतम्। एवं च विषयतावच्छेदकत्वरूपं प्रवर्तनात्वम् इष्टसाधनत्वे अस्तीति तदेव प्रवर्तनात्वावच्छिन्नरूपः लिङ्वाच्योऽर्थः।

चन्द्रमण्याद्यानयने कदाचिदिष्टसाधनेऽपि प्रवृत्यभावात् मधुविषसम्पृक्तभोजने च प्रवृत्यभावदर्शनात् कृतिसाध्यत्वस्य बलवदनिष्टाननुबन्धित्वस्य विध्यर्थत्वं स्वीकार्यम्। किन्तु वैयाकरणैः नरकादिवलवदनिष्टाननुबन्धित्वेऽपि आस्तिककामुकस्य रागात् परस्त्रीगमने प्रवृत्तिदर्शनेन व्यभिचारः, तस्मात् नैतयो: ज्ञानयोः लिङवाच्यतेति। कौण्डभट्टः तथैव व्याचष्टे यद्यप्येतद् कृतिसाध्यत्वस्यापि अस्ति तज्ज्ञानस्यापि प्रवर्तकत्वात् तथापि यागादौ सर्वं तल्लोकत एवं लभ्यत इत्यनन्यलभ्यत्वान्न तच्छक्यम्। तस्मात् वैयाकरणानां मते केवलमिष्टसाधनत्वमेव प्रवर्तना, अत्र विषये मण्डनमिश्रोऽपि वदति

‘‘**पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः।**

**प्रवृत्तिहेतुं धर्मञ्च प्रवदन्ति प्रवर्तनाम्॥''**[369]

प्राणिमात्रस्येष्टसाधनत्वातिरिक्तान्यः क्रियासु प्रवर्तकः नास्ति। प्रवृत्तिहेतुं धर्मञ्च प्रवर्तनां प्रवदन्ति। अनेन मण्डनमिश्रकारिकाव्याख्यानेनेदं निश्चितं प्रतिभाति यदिष्टसाधनत्वमेव प्रवर्तना, वैयाकरणमण्डनमिश्रयोः एकमेव मतम्। प्रभाकरस्तु भिन्न प्रतिपादयति यस्य विचार: करिष्यते।

**लिङर्थे मतान्तरानुवादः, तद्दूषणं च॥**

प्रवर्तनात्वं नाम प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वं, तच्च इष्टसाधनत्वस्य वर्तते तदेव लिङर्थ इति वैयाकरणमतम्। तत्रैव विषये केचन विप्रतिपन्नाः। यथा

**न्यायमतम्**

यथा इष्टसाधनत्वे एतादृशं प्रवर्तनात्वं वर्तते तथा कृतिसाध्यत्वेऽपि वर्तते। तस्मात्कृतिसाध्यत्वमपि विध्यर्थः इति स्वीकर्तव्यमिति वदन्ति। अन्यथा इष्टसाधनताबुद्धिमात्रस्य प्रवृत्तिजनकत्वस्वीकारे चन्द्रगमनं मदिष्टसाधनमिति इष्टसाधनताबुद्धौ सत्यामपि चन्द्रगमने प्रवृत्तिर्न जायते इति कार्यकारणभावस्य व्यभिचारः स्यात्। अतः तन्मात्रस्य न प्रवृत्तिजनकविषयतावच्छेदकत्वरूपं प्रवर्तनात्वमपि तु कृतिसाध्यत्वस्यापि। कृतिसाध्यताज्ञानस्यापि प्रवृत्तिजनकत्वस्वीकारे तु चन्द्रगमने इष्टसाधनताबुद्धौ सत्यामपि कृतिसाध्यताज्ञानं नास्ति। अतस्तदभावाद् प्रवृत्तिर्वार्यते।

एवमेव बलवदनिष्टाननुबन्धित्वज्ञानमपि प्रवृत्तिजनकमिति मन्तव्यम्। तथा च प्रवृत्तिजनकं यत् ज्ञानं बलवदनिष्टाननुबन्धित्वज्ञानम्। तद्विषयतावच्छेदकं| बलवदनिष्टाननुबन्धित्वमिति विषयतावच्छेदकत्वरूपं प्रवर्तनात्वं तत्रापि अस्ति। बलवदनिष्टाननुबन्धित्वज्ञानस्यापि प्रवृत्तिजनकत्वास्वीकारे विषसंपृक्तमधुभोजने कर्मणि पुरुषस्य इष्टसाधनताबुद्धिरस्ति, कृतिसाध्यताबुद्धिरपि वर्तते इति तत्र प्रवृत्तिस्स्यात्। बलवदनिष्टाननुबन्धित्वज्ञानस्यापि प्रवृत्तिहेतुत्वस्वीकारे तु तत्र विषसंपृक्तमधुभोजने इदं भोजनं मदनिष्टं मरणं साधयतीति अनिष्टानुबन्धित्वज्ञानमेवास्ति। न तु अनिष्टाननुबन्धित्वज्ञानमिति न तादृशे कर्मणि प्रवृत्तिः।अर्थात्त नैयायिकानां किमपि भिन्नमेव मतं विद्यते। तेषां मते

**१. बलवदनिष्टाननुबन्धित्वम्**

**२. इष्टसाधनत्वम्**

**३. कृतिसाध्यत्वम्**

इत्येते त्रयः विध्यर्थाः ते धात्वर्थगताश्चेति स्वीकुर्वन्ति। तथा चोक्तम् शब्दशक्तिप्रकाशिकायाम् **'प्रवर्तकचिकीर्षायां यत्प्रकारकज्ञानस्य हेतुत्वं तत् सर्वं ग्राह्यम्''** इति, एवञ्च यजेत्, पचेत् इत्यादौ यागः कृतिसाध्यः, इष्टसाधनः, बलवदनिष्टाननुबन्धी च इत्याकारको बोधः। एतत्त्रयमाश्रित्य लोकः सर्वत्र प्रवर्तते। एवञ्च निष्प्रयोजने जलताडनादौ प्रवृत्यभावात् बलवदनिष्टाननुबन्धित्वरूपज्ञानस्यापि प्रवृत्तिं प्रति कारणत्त्वं स्वीकार्यम्।

---

[369] दर्पणव्याख्या 138

व्युत्पत्तिवादेऽपि गदाधरभट्टाचार्योऽपि त्रयाणां प्रवर्तकज्ञानविषयत्वं स्वीकरोति। तथाहि विधिः प्रवर्तनाज्ञानविषयो धर्मः, स च धर्मः न्यायनये। कृतिसाध्यत्वं बलवदनिष्टाननुबन्धित्वसहितमिष्टसाधनत्वमेवञ्च त्रयाणां ज्ञानानां विध्यर्थस्वीकारे प्राच्यनव्ययो: नास्ति मतभेदः। इदं विचारणीयं भवति यत् त्रिषु शक्तिः पृथक् पृथक् उत त्रितयानुगता एकैवेति इत्यत्र नैयायिकानामपि परस्परं विवादो दृश्यते।

नवीनास्तु त्रिषु पृथक् पृथक् शक्तिं स्वीकुर्वन्ति। अत एव सकृदुच्चरितस्य लिङादे: अर्थत्रयबोधकत्वं युगपदेव भवति। प्राचीनास्तु पुष्पदवन्तपदादिवत् त्रिषु एकैव शक्तिरिति स्वीकुर्वन्ति।

प्राचीननैयायिकाः विधिविधायकः सूत्रे विधिशब्दं प्रयुक्तवन्तः। यद्वाक्यं विधायक प्रेरकञ्च स बाधः। भाष्यकारोऽपि तथैव वदति वतियोगोऽनुज्ञा वा विधिः। यद् वाक्यं देशकं विधायकं स विधिरिति वार्तिककाराः। एवञ्च निष्कृष्टतया ज्ञानं जनयति, यथा यजेत शब्दं श्रुत्वा यमर्थं ज्ञात्वा प्रवर्तते, तद्बोधक वाक्यं विधिरुच्यते। सर्वाणि वाक्यानि तथा प्रवर्तकानि न भवन्ति, किन्तु लिङादिघटितानि वाक्यानि एवं प्रवर्तकानि। अत एव लिङ्लकारस्यार्थः विधिः। लोके एतादृशी स्थितिर्न विद्यते। लोकस्तु इष्टसाधनं ज्ञात्वैव प्रवर्तते। तस्मादिष्टसाधनत्वमेव विधिः, अत एव न्यायवार्तिककारः कथयति – इदं सुखसाधनमिति बुध्वा सुखाव्याप्तये यतते। इदं दुःखसाधनमिति चावगम्य दुःखता नाम इति वाचस्पतिरपि तथैवानुवदति। तस्मादपेक्षितोपायता प्रवर्तना स्वात्मनि सिद्धा, वृद्धस्यापि प्रवृत्तिहेतुरित्यवगच्छति व्युत्पिसुः बालः। एतावता निश्चितं भवति यदिष्टसाधनत्वमेव विध्यर्थ इति प्राचीननैयायिकाः। न्यायकुसुमाञ्जलिकारोऽपि वदति

**विधिर्वक्तुरभिप्रायः पृत्यादौ लिङगदिभिः।**
**अभिधेयोऽनुमेया तु कर्तुरिष्टाभ्युपायता॥**

इति श्लोकेनेदं विज्ञातं भवति यत् प्रवर्तना एवं विधिः स एव लिङर्थः। इष्टसाधनत्वस्य वक्तुरभिप्रायेणानुमीयते। तद्यथा गामानय इति प्रयोजकवाक्यं श्रुत्वा बालः अयं प्रयोजकः वृद्धः इच्छति, यदयं गवानयने प्रवर्तताम्, एवञ्च गवानयनं मदिष्टसाधनत्वमित्यनुमिनोति, ततः प्रवर्तते न कलजं भक्षयेदिति निषेधस्थले च कलञ्जभक्षणगोचराणां प्रवृत्तौ आप्तेच्छाविषयत्वाभावो बोध्यते। इति कृत्वा आप्ताभिप्राय एव विधिः।

## न्यायमतसमीक्षा

अतः इष्टसाधनत्ववत् कृतिसाध्यत्वस्य, बलवदनिष्टाननुबन्धित्वस्य च प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वरूपस्य प्रवर्तनात्वस्य सत्त्वात् तत्रापि लिङः शक्तिः कल्पनीया इति मतान्तरम्। किन्तु नेदं मतं सङ्गतम्। यतो हि कृतिसाध्यताबुद्धेः भवतु प्रवृत्तिजनकत्वं, एवं कृतिसाध्यत्वस्य भवतु प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वं तावतापि तस्य न लिङ्वाच्यत्वसिद्धिः। यतो हि अनन्यलभ्यः शब्दार्थः इति न्यायेन प्रकारान्तरेण अलभ्य एवार्थः शब्दस्य शक्योऽर्थो भवति। प्रकृते कृतिसाध्यत्वं तु अनुमानप्रमाणगम्यं भवति। यागो मत्कृतिसाध्यः मत्कृतिसाध्यत्वविरोधिधर्मानाक्रान्तत्वात्, चन्द्रगमनं मत्कृत्यसाध्यं मत्कृतिसाध्यत्वविरोधिधर्माक्रान्तत्वात् इति अनुमानप्रमाणेनैव कृतिसाध्यत्वासाध्यत्वे ज्ञातुं शक्ये इति न तयोः लिङा बोध्यत्वमिति वैयाकरणमतम्।

एवमेव बलवदनिष्टाननुबन्धित्वमपि न लिङर्थः। यतः कार्यमात्रं प्रति प्रतिबन्धकाभावस्य कारणत्वं सर्वतन्त्रसिद्धमस्ति। प्रतिबन्धकसद्भावे कार्यानुदयात्कार्यमात्रं प्रति प्रतिबन्धकाभावो हेतुः। एवं च विषसंपृक्तमधुभोजने कृते मरणं जायेत, अतः भोजनजन्यसुखापेक्षया दुःखमेव अधिकमस्तीति ज्ञानं तादृशे कर्मणि द्वेषमुत्पाद्य प्रवृत्तिं प्रतिबध्नाति। अतः तत्र दुःखाधिक्यज्ञानेन यो द्वेषोऽस्ति स एव प्रतिबन्धकः। द्वेषाभावः प्रतिबन्धकाभावविधया कार्यमात्रं प्रति हेतुरिति तस्य न लिङ्वाच्यत्वस्वीकारः। अतः केवलमिष्टसाधनत्वमेव लिङर्थः इति वैयाकरणमतम् इति स्वीकर्तव्यः।

अन्यथा **न कलञ्ज भक्षयेत्'** इत्यत्र नञ् पदं केवलं बलवदनिष्टाननुबन्धित्वमात्रस्याभावं बोधयति। तत्रेष्टसाधनत्वप्रकारकज्ञानस्य, कृतिसाध्यत्वप्रकारकज्ञानस्य चाभावं नैव बोधयति, तादृशानुभवाभावात्। एवञ्च तेषां मते तस्यैव लिङर्थत्वं स्यात्। एवञ्च नैयायिकानां मते घटो नास्ति इत्यादौ नबर्थस्य प्रथमान्तार्थेऽन्वयो भवति। लिङर्थस्य धात्वर्थत्वेऽन्वयस्वीकारे अनेकविध कार्यकारणभावः शाब्दबोधार्थं स्वीकरणीयः स्यात्।

**<u>मीमांसकमतम्</u>**

न्यायसिद्धान्तमुक्तावल्यां गुणनिरूपणावसरे कार्यताज्ञानस्यैव प्रवर्तकत्वं स्वीकृतं प्रभाकरेण। तथाहि कार्यताज्ञानमिति प्रवर्तकमिति गुरवः। गुरुपदोपादानेन प्रभाकरमतमित्यनुमीयते। अयं भावः कार्यताज्ञानं द्विविधम्

**१. मया इदं कर्तुं शक्यमित्येकम्**

**२. ममेदमवश्यं कार्यमिति द्वितीयम्**

प्रवर्तकत्वेन तस्यैव विध्यर्थत्वम्। तस्मात् फलति कार्यत्वमेव विध्यर्थः, शुचि सन्ध्यामुपासीत" इत्यादिवैदिकविधौ शुचिनि योज्यसन्ध्यावन्दनादिकं कार्यमिति बोधः।भाट्टमते तु प्रवर्तना एव लिङर्थः। प्रवर्तना च प्रवर्तयितुः व्यापारविशेषः। अपौरुषेये वेदे पुरुषस्याभावात् भावनायाः शब्दनिष्ठत्वमिति स्वीक्रियते। एवंरीत्या व्याकरणमते प्रवर्तनेष्टसाधनत्वरूपैव गृहीता भवति।

**विध्यर्थे मीमांसकमतम्** भाट्टमीमांसकाः वैयाकरणा इव इष्टसाधनत्वं विधिरिति स्वीकुर्वन्ति। तथाहि चोदनालक्षणो धर्म इति सूत्रे भाष्ये चोदना क्रियाप्रवर्तक वाक्यमिति, यः श्रेयस्करः सः धर्मः, तस्मात् श्रेयस्साधनत्वं धर्मस्य सिद्धम्। तस्मात् इष्टसाधिकैव प्रवर्तना, अत एव भाटैरुच्यते

**प्रवृत्तौ वा निवृत्तौ वा यः शब्दश्रवणेन धीः।**

**सा चोदनेति सामान्य लक्षणं हृदये स्थितम्॥**

**फलतोऽपि च यत् कर्म नानार्थत्वेनानुबध्यते।**

**केवलं प्रीतिहेतुत्वात् तद्धर्मत्वेन गीयते॥**

**पुसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः।**

**प्रवृत्तिहेतुं धर्मञ्च प्रवदन्ति प्रवर्तनाम्॥**[370]

**प्रभाकाराः**

स्वर्गकामो यजेत इत्यादौ कामशब्दबलात् कामस्य साध्यत्वम् इति प्रतीयते। स च स्वर्गः नियोज्ये विशेषणम्, नियोगापरपर्यायमपूर्वाख्यं स्वर्गसाधनत्वं लिङर्थः। अत एवोक्तम् -

**नियोज्यः स हि यः, कार्यं ममेदमिति बुध्यते।**
**कर्ता तु धातुनोपात्तं व्यापार प्रति कारणम्॥**[371]

तेषां मते शाब्दबोधः स्वर्गकामो यजेत इत्यादौ स्वर्गकामनियोज्यं यागविषयक कार्यम् इति बोधः प्रथमः। स नियोज्यकं यागविषयं स्थायिस्वर्गसाधनमिति तृतीयः, स्वर्गकामो याग कर्ता इति चतुर्थः। एषु बोधेषु क्रमशः स्वर्गकामस्य नियोज्यत्वमधिकारित्वं कर्तृत्वमिति ज्ञायते। इष्टसाधनत्वन्तु न विध्यर्थः यागे क्षणिकतयाऽवगते तस्य बोधयितुमशक्यत्वात्।

**खण्डदेवमतम्**

खण्डदेवमते लिङर्थः विचारणीय इति कृत्वा विचार्यते। खण्डदेवः वक्ति शाब्दीभावना लिङ्वाच्यः। तथाहि अभिधां भावनामाहुरन्यामेव लिङादयः। लिङोऽभिधा सैव च शब्दभावना भाव्या च तस्याः, पुरुषप्रवृत्तिसम्बन्धबोधः करणं तदीयं प्रयुज्यते। लिङप्रयोगेऽयं मां प्रवर्तयति इति नियमतः प्रतीतेः सत्वात् प्रेरणार्थी यः शाब्दीभावनाख्यः व्यापार एव लिङ्वाच्यः। स च व्यापारप्रवर्तकपुरुषवृत्तितात्पर्यविशेषः। वेदे पुरुषस्याभावात् शब्द एव प्रवर्तकः, सा एव शाब्दीभावना पदेनोच्यते। नागेशोऽपि तथैव मन्यते, तथाहि नातिरिक्तो व्यापारः प्रवर्तना प्रामाण्याभावात्, किन्तु लिङात्मकशब्दप्रयोगरूपव्यापारो गृहीतव्यः। अयं व्यापारः लोकवेदसाधारणः, उभाभ्यां प्रेरणात्वेन तस्याः सविषयत्वमङ्गीक्रियते। शक्यतावच्छेदकं च प्रेर्यादिधात्वर्थतावच्छेदकतया सिद्धं प्रेरणत्वमखण्डोपाधिरूपम्। अनयोर्मध्येऽयमेव भेदः यत् शाब्दीभावना, आर्थीभावना चोभयत्रापि लिङवाच्यम्। एका लिङत्वावच्छेदेन वाच्यः, एका चाख्यातत्वावच्छेदेन वाच्येति खण्डदेवाशयः। शाब्दीभावना लिङ्वाच्या, आर्थीभावना तु धातुवाच्येति। अत इष्टसाधनत्वमिति न विध्यर्थः। किञ्चेष्टसाधनत्वस्य विध्यर्थत्वे हेतुमति च सूत्रभाष्यविरोधापत्तिः। तत्र हि प्रयच्छतु मात्र भवान् इत्यत्र णिच् कस्मान् न भवति इति प्रश्ने अकर्तृत्वादित्युक्तं भाष्ये। तत्र लिङादिशब्दप्रयोगरूपप्रयोजकव्यापारस्य सत्वात् इत्याशयेनैव इमां शङ्का समाधत्ते। इष्टसाधनस्य विध्यर्थत्वे तस्य णिजर्थत्वाभावात् शङ्कासमाधानपरकभाष्यमसङ्गतं स्यात्। विधिनिमन्त्रणसूत्रभाष्येऽपि विधिः प्रेरणमित्युक्तम्। वात्सायनोऽपि वदति प्रवर्तकनिष्ठव्यापाररूप एव विधिः। इष्टसाधनत्वं चात्र प्रवर्तनाम् इत्याकारकेच्छाविषयत्वेन ज्ञातं भवति।

[370] दर्पणव्याख्या- 135
[371] तत्रैव

वैयाकरणानां मते प्रवर्तना एव विधिः। स च व्यापारः इष्टसाधनत्वरूप एवं लोके सर्व एव पुरुषः, इदं क्रियमाणं यदिष्टसाधनमिति निश्चित्य प्रवर्तत इति सर्वेषामनुभवः। प्रयोजकवाक्य श्रवणानन्तरमेव प्रयोज्यवृद्धस्य प्रवृत्तिं दृष्ट्वा पाश्र्वस्थः बालः स्वप्रवृत्तिसाधनेन प्रथमं मदिष्टसाधनमिति ज्ञानमनुमिनोति। प्रयोज्यवृद्धस्यास्मिन् कर्मणि प्रवृत्तिः इष्टसाधनताज्ञानपूर्विकाप्रवृत्तित्वात् मदीयप्रवृत्तिवदेवमिष्टसाधनत्वज्ञानस्यानुमितेः सत्वात् ज्ञानस्य कारणं किमिति प्रश्ने तज्ज्ञानं लिङादिघटितवाक्यश्रवणसमनन्तरस्यैव भवति। तस्मात् इष्टसाधनत्वं लिङ्वाच्यमिति स्वीकर्तव्यमेवेति शाब्दिकमतम्। अभिहितञ्च कौण्डभट्टेन प्रवृत्तिजनकज्ञानविषयतावच्छेदकत्वं प्रवर्तनात्वम्, तच्चेष्टसाधनत्वस्यास्ति, स च भवति विध्यर्थः। नागेशोऽपि पक्षममुं स्वीकरोति॥

**वैयाकरणमते मण्डनमिश्रसंवादः**

इष्टसाधनत्वमेव लिङर्थः। कृतिसाध्यत्वं वा बलवदनिष्टाननुबन्धित्वं वा नार्थ इति वैयाकरणपक्षः। अमुमेव पक्ष मण्डनमिश्रा अपि समर्थयन्ति। तथा चोक्तं तैः

**पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः।**
**प्रवृतिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम्॥ इति**[372]

पुंसां पुरुषाणां, क्रियासु कर्मसु, इष्टाभ्युपायत्वाद् इष्टसाधनत्वापेक्षया, अन्यः भिन्नः कश्चन, प्रवर्तकः प्रवृत्तिजनकः, न नास्ति। पर्वतनाम् इष्टसाधनतामेव प्रवृत्तिहेतुं धर्म प्रवृत्तिजनकतावच्छेदकधर्म, प्रवदन्तिप्रवर्तनाशब्दार्थं वदन्ति। इत्याशयः॥

एवं चात्र पूर्वार्धन इष्टाभ्युपायत्वात् अन्यः प्रवर्तकः न इति कथनेन इष्टसाधनत्वमेव लिङर्थः। तदपेक्षया भिन्नःधर्मः कृतिसाध्यत्वरूपो वा अनिष्टाननुबन्धित्वरूपो वा नास्तीति स्पष्टमेव प्रतीयते। एवं च मण्डनमिश्रा अपि वैयाकरणमतमेव समर्थयन्तीति कृतिसाध्यत्वादेः लिङर्थत्वं वदतां मतमयुक्तमेव।

**२. लिङ्चोर्ध्वमौहूर्त्तिके ३.३.९**

मुहूर्ताद् ऊर्ध्वम् इति ऊर्द्धमुहूर्तम् इति निपातनात्पञ्चमीतत्पुरुषसमासः। ऊर्द्धमुहूर्ते भव इति **बह्वचोऽन्तोदात्ताट्ठञ्** [373]इति सूत्रेण ठञ्प्रत्यये, तत उत्तदरपदवृद्धौ ऊर्ध्वमौहूर्तिकः इति सिद्ध्यति। सा उत्तरपदवृद्धिश्च निपातनात् भवति। भविष्यतः प्रकृतत्वात् तस्यैवोध्वमौहूर्त्तिकग्रहणं विशेषणम्। तच्चाह काशिकाकारः **ऊर्ध्वं मुहूर्ताद् भवः ऊर्ध्वमौहूर्तिकः। निपातनात समासः, उत्तरपदवृद्धिश्च। भविस्यतश्च एतद् विशेषणम्।** ऊर्ध्वमौहूर्तिके इति सप्तम्येकवचनान्तं पदम्। लिङ् इति प्रथमैकवचनान्तं पदम्। च इति अव्ययम्। अत्र **प्रत्ययः** [374] **परश्च** [375] **आद्युदात्तश्च** [376] **धातोः** [377] इत्येतानि अधिक्रियन्ते। अत्र **लोडर्थलक्षणे च** [378]**इत्यतः**

---

372 दर्पणव्याख्या- 138 पृष्ठा
373 अ ध्या **४|३|६७**
374 तत्रैव ३.१.१
375 तत्रैव ३.१.२
376 तत्रैव ३.१.३
377 तत्रैव ३.१.९१

लोडर्थलक्षणे इति **भविष्यति गम्यादयः** [379] **इत्यतः** भविष्यति इति, **यावत्पुरानिपातयोर्लट्** [380] इत्यतः लट् इति **विभाषा कदाकर्ह्योः** [381] इत्यतः विभाषा इति च अनुवर्तन्ते।

लोडर्थलक्षणार्थे ऊर्ध्वमौहूर्तिके भविष्यति काले वर्तमानात् धातोर्विभाषया लिङ्प्रत्ययो भवति, चकाराल्लट् च।

एकमुहूर्तादनन्तरं उपध्यायः आगमिष्यतीत्यतः वेदं पठतु इत्यर्थकम् **ऊर्ध्वं मुहूर्तातुपरि मुहूर्तस्य उपाध्यायश्चेदागच्छेत्, अथ त्वं छन्दो ऽधीष्व, अथ त्वं व्याकरणम् अधीष्व** इत्युदाहरणे लोडर्थलक्षणार्थोर्ध्वमौहूर्तिकभविष्यतिकालस्य सत्त्वात् प्रकृतसूत्रेण आङ् पूर्वकात् गम्लृ गतौ इति धातो लिङ्लकारे आगच्छेत् इति प्रयोगः कृतः। लटि तु **उपाध्यायश्चेदागच्छति, अथ त्वं छन्दो ऽधीष्व, अथ त्वं व्याकरणम् अधीष्व** इति व्यवहारः। विभाषापक्षे तु लृट्लुटौ **उपाध्यायश्चेदागमिष्यति, उपाध्यायश्चेदागन्ता, अथ त्वं छन्दो ऽधीष्व, अथ त्वं व्याकरणम् अधीष्व इति** व्यवहारौ भवतः।

### ३. आशंसावचने लिङ् ३.३.१३४

आशंसनम् आशंसा। अप्राप्तस्य प्रियार्थस्य प्राप्तुम् इच्छा इति तदर्थः। आशंसा उच्यते अनेन इति आशंसावचनम्, तस्मिन् आशंसावचने इति सप्तम्येकवचनान्तं पदम्। लिङ् इति प्रथमैकवचनान्तं पदम्। अत्र **प्रत्ययः** [382] **परश्च** [383] **आद्युदात्तश्च** [384] **धातोः** [385] इत्येतानि अधिक्रियन्ते। अत्र **भविष्यति गम्यादयः** [386] **इत्यतः** भविष्यति इति, अनुवर्तते।

आशंसावाचिन्युपपदे भविष्यति काले धातोः परः लिङ् स्यात्। सूत्रमिदं आशंसायां भूतवच्च ३.३.१३२ इत्यस्य अपवादः।

उपाध्याये आगते सति पठिष्यामि इत्यर्थकात् **उपाध्यायश्चेदागच्छेत्, आशंसे युक्तोऽधीयीय** इति उदाहरणवाक्यात् आशंसा भविष्यत्किलिकत्वमिति उभयमपि गम्यते। अतः प्रकृतसूत्रेण भूतवद्भावस्य वर्तमानवद्भावस्य च अपवादत्वेन लिङ्प्रत्ययो विधीयते। तेन अधीयीय इति रूपं भवति।

### ४. विभाषा कथमि लिङ् च ३.३.१४३

---

378 तत्रैव **३|३|८**
379 तत्रैव ३.३.३
380 तत्रैव ३.३.४
381 तत्रैव ३.३.५
382 तत्रैव ३.१.१
383 तत्रैव ३.१.२
384 तत्रैव ३.१.३
385 तत्रैव ३.१.९१
386 तत्रैव ३.३.३

विभाषा इति प्रथमान्तं पदम्। कथम् इति शब्दस्य सप्तम्यन्तरूपं कथमि। लिङ् इति प्रथमान्तं पदम्। च इति अव्ययम्। चकारल्लट् विधीयते। अत्र **गर्हायां लडपिजात्वोः**[387]इत्यतः गर्हायाम् इति सप्तम्यन्तं पदमनुवर्तते। गर्ह्यते निन्द्यते इति गर्ह कुत्सने इति धातो **गुरोश्च हलः**[388] इति स्त्रियाम् अप्रत्यये ततः टापि गर्हा इति सिद्ध्यति। निन्दा इति तदर्थः। अत्र **प्रत्ययः [389] परश्च [390] आद्युदात्तश्च [391] धातोः [392]** इत्येतानि अधिक्रियन्ते।

गर्हायां गम्यमानायां कथमि इत्युपपदे धातोः लिङ् प्रत्ययो भवति, चकाराल् लट् च।

**कथं नाम तत्रभवान् वृषलं याजयेत्, कथं नाम तत्रभवान् वृषलं याजयति** इत्यदिषु उदाहरणेषु ताच्छील्यप्रतिपादनेनात्र गर्हा ज्ञायते, अपि च कथम् इति योगोऽपि वर्तते। अतः प्रकृतसूत्रेण लिङ्लटौ प्रत्ययौ भवतः। उक्तविषये भविष्यति काले क्रियाया अनिष्पत्तौ गम्यमाने **लिङ्निमित्ते लृङ् क्रियातिपत्तौ** इति नित्यमेव लृङ्प्रत्यते **कथं नाम तत्रभवान् वृषलं याजयिष्यति** इति व्यवहारो भवति।

भूते वर्तमाने भविष्यति च कालत्रये विभाषाग्रहणाल्लिङ्लटोरभावपक्षे लिट्लङ्लुङ्लट्लुट्लृटाः इत्यादयः लकारा अपि भवन्ति।

## ५. किंवृत्ते लिङ्लृटौ ३.३.१४४

वर्ततेऽस्मिन्निति विग्रहे **क्तोऽधिकरणे च** इत्यधिकरणे क्तप्रत्यये वृतम् इति शब्दः निष्पन्नः। किमः वृत्तं इति किंवृत्तम्। किम् इत्यस्माद् यानि रूपाणि भवन्ति तेषां ग्रहणं किंवृत्तम् इति पदेन भवति। एतद्विषये आह पदमञ्जरीकारः **यत्र किंशब्दोऽवयवत्वेन वर्तते तत्सर्वं किंवृतम् इति।** तस्मिन् किंवृत्ते इति सप्तम्येकवचनान्तं पदम्। किमेतच्छब्दरूपं विभक्त्यन्तं वृत्तग्रहणेन प्रतीयते। तेन **किंयत्तदौर्निर्धारणे द्वयोरेकस्य डतरच्** [393] इत्यनेन, **वा बहूनां जातिपरिप्रश्ने डतमच्** [394] इत्यनेन च यथाक्रमं इत्येतौ डतरडतमौ प्रत्ययौ किंशब्दसम्बन्धिनावेव वृत्तग्रहणेन प्रतीयते। लिङ् च लृट् च इति इतरेतरद्वन्द्वे लिङ्लिटौ इति प्रथमान्तं पदम्। अत्र **गर्हायां लडपिजात्वोः**[395] इत्यतः गर्हायाम् इति सप्तम्यन्तं पदमनुवर्तते। गर्ह्यते निन्द्यते इति गर्ह कुत्सने इति धातो **गुरोश्च**

---

[387] तत्रैव **३.३.१४२**
388 अ. ध्या ३.३.१३
389 तत्रैव ३.१.१
390 तत्रैव ३.१.२
391 तत्रैव ३.१.३
392 तत्रैव ३.१.९१
393 तत्रैव ५.३.९२
394 तत्रैव ५.३.९३
[395] तत्रैव **३.३.१४२**

**हलः**[396] इति स्त्रियाम् अप्रत्यये ततः टापि गर्हा इति सिद्ध्यति। निन्दा इति तदर्थः। अत्र **प्रत्ययः** [397] **परश्च** [398] **आद्युदात्तश्च** [399] **धातोः** [400] इत्येतानि अधिक्रियन्ते।

गर्हायां गम्यमानायाम् किंवृत्तयोगे धातोः परः लिङ्लृटौ प्रत्ययौ भवतः।

**को नाम वृषलो यं तत्रभवान् याजयेत्, यं तत्रभवान् वृषलं याजयिष्यति। कतरो नाम, कतमो नाम यां तत्रभवान् वृषलं याजयेत्, याजयिष्यति** इत्यदिषु उदाहरणेषु ताच्छील्यप्रतिपादनेनात्र गर्हा ज्ञायते, अपि च किंवृत्तानां योगो वर्तते। अतः प्रकृतसूत्रेण लिङ्लृटौ प्रत्ययौ भवतः।

६. **<u>अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि ३.३.१४५</u>**

किमो वृत्तं किंवृत्तं, न किंवृत्तमकिंवृत्तं, तस्मिन् अकिंवृत्ते, षष्ठीतत्पुरुषगर्भनञ्तत्पुरुषः। किम् इत्यस्माद् यानि रूपाणि भवन्ति तेषां ग्रहणं किंवृत्तम् इति पदेन भवति। एतद्विषये आह पदमञ्जरीकारः **यत्र किंशब्दोऽवयवत्वेन वर्तते तत्सर्वं किंवृतम् इति।** अवक्लृप्तिः सम्भवना, न अवक्लृप्तिरनवक्लृप्तिः, नञ्तत्पुरुषः। मर्षः क्षमा, न मर्षोऽमर्षः, नञ्तत्पुरुषः। अनवक्लृप्तिश्च अमर्षश्च तयोरितरेतरयोगद्वन्द्वः अनवक्लृप्त्यमर्षौ, तयोरनवक्लृप्त्यर्षयोः। अनवक्लृप्त्यमर्षयोः सप्तम्यन्तं पदम्। अकिंवृत्ते सप्तम्यन्तम्, अपि इत्यव्ययम्। अत्र **किंवृत्ते लिङ्लृटौ**[401]इत्यतः लिङ्लृटौ इति अनुवर्तते। अत्र **प्रत्ययः** [402] **परश्च** [403] **आद्युदात्तश्च** [404] **धातोः** [405] इत्येतानि अधिक्रियन्ते।

सति असति च किंवृत्ते उपपदे अनवक्लृप्त्यमर्षयोः गम्यमानयोः सत्योः धातोः कालसामान्ये अर्थे सर्वलकाराणाम् अपवादत्वेन लिङ्लृटौ प्रत्ययौ भवतः।

**अनवक्लृप्तौ तावत् न अवकल्पयामि न सम्भावयामि, न श्रद्दधे, तत्रभवान् नाम वृषलं याजयेत्, तत्रभवान् नाम वृषलं याजयिष्यति** इत्यत्र अनवक्लृप्त्यवगमात् इति, किंवृत्तम्, अकिंवृत्तम् च उपपदसत्वात् प्रकृतसूत्रेण यज पूजासंगतिकरणदानेषु इति धातोः लिङ्लृटौ प्रत्ययौ भवतः। तथैव **अमर्षे न मर्षयामि तत्रभवान् वृषलं याजयेत्, याजयिष्यति। को नाम वृषलो यं तत्रभवान् याजयेत्, याजयिष्यति** इत्यत्र अमर्षपदयोगे पूर्ववत्प्रक्रिया।

**<u>अनवक्लृप्त्यमर्षयोः इति पदविचारः</u>**

---

396 अ. ध्या ३.३.१३

397 तत्रैव ३.१.१

398 तत्रैव ३.१.२

399 तत्रैव ३.१.३

400 तत्रैव ३.१.९१

401 तत्रैव **३.३.१४४**

402 तत्रैव ३.१.१

403 तत्रैव ३.१.२

404 तत्रैव ३.१.३

405 तत्रैव ३.१.९१

अनवक्लृप्तिश्च अमर्षश्च अनवक्लृप्त्यमर्षौ इति इतरेतरद्वन्द्वे विद्यमानः अमर्षशब्दो अनवक्लप्तिशब्दापेक्षयाल्पाच्तरोऽस्ति। अतः समस्तपदे **अल्पाच्तरम्**[406] इति सूत्रेण तस्य पूर्वनिपातो कर्तव्यः। परन्तु तदकृत्वा अत्र वह्वचोऽनवुक्लृप्तिशब्दस्य पूर्वनिपातः कृतः। तेन लक्षणव्यभिचारार्थतां दर्शयति।

**<u>अपि पदविचारः</u>**

यथेह पूर्वनिपातलक्षणं व्यभिचारात् स्वविषये न प्रवर्तते, तथैव यथासंख्यं लक्षणम् अपीति, तेन यथासंख्यं न भवति। अपिग्रहणं किंवृत्तेऽपि यथा स्यात्। यतो हि अपि ग्रहणाभावे अकिंवृत्ते इति पदग्रहणे केवलं अकिंवृत्ते एव स्यात्। **उपकादिभ्योऽन्यतरस्याम्**[407] इत्यत्राद्वन्द्वग्रहणं द्वन्द्वाधिकारनिवृत्त्यर्थं कृतमस्ति। तथेहाप्यकिंवृत्तग्रहणं किंवृत्ताधिकारनिवृत्त्यर्थं स्यात्, तथा च तस्मिन्निवृत्ते किंवृत्तेऽकिंवृत्ते प्रत्ययद्वयं भविष्यतीति व्याख्यायते, तदा अपि ग्रहणं शक्यतेऽकर्तुम्।

७. **<u>जातुयदोर्लिङ् ३.३.१४७</u>**

जातुश्च यत् च इति जातुयदौ इति इतरेतरद्वन्द्वः। तयोः जातुयदोः इति सप्तम्यन्तं पदम्। लिङ् इति प्रथमान्तं पदम्। अत्र **अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि**[408] इत्यतः अनवक्लृप्त्यमर्षयोः इति अनुवर्तते। अत्र **प्रत्ययः** [409] **परश्च** [410] **आद्युदात्तश्च** [411] **धातोः** [412] इत्येतानि अधिक्रियन्ते।

अनवक्लृप्त्यमर्षयोः गम्यमानयोः जातु यदा इत्येतयोः उपपदयोः धातोः लिङ् प्रत्ययो भवति इति सूत्रार्थः।

**जातु तत्रभवान् वृषलं याजयेत्, न श्रद्दधे, न मर्षयामि** इत्यत्र अनवक्लृप्तावगमनात् जातु इति उपपदसत्वाच्च प्रकृतसूत्रेण यज पूजासंगतिकरणदानेषु इति धातोः लिङ्प्रत्ययो भवति। **यन् नाम तत्रभवान् वृषलं याजयेत् न श्रद्दधे, न मर्षयामि** इत्यत्र यच्छब्दयोगे लिङ्प्रत्ययः। उक्तविषये भविष्यति काले क्रियाया अनिष्पत्तौ गम्यमाने **लिङ्निमित्ते लृङ् क्रियातिपत्तौ इति** नित्यमेव लृङ्प्रत्ययान्तः व्यवहारो भवति।

अनवक्लृप्तिश्च अमर्षश्च अनवक्लृप्त्यमर्षौ इति इतरेतरद्वन्द्वे विद्यमानः अमर्षशब्दो अनवक्लप्तिशब्दापेक्षयाल्पाच्तरत्वात् **अल्पाच्तरम्** [413]इति सूत्रेण तस्य पूर्वनिपाते कर्तव्ये वह्वचोऽनवुक्लृप्तिशब्दस्य पूर्वनिपाते क्रियमाने लक्षणव्यभिचारार्थता भवति। यथेह पूर्वनिपातलक्षणं व्यभिचारात् स्वविषये न प्रवर्तते, तथैव, जातुयदोः इति विषयेऽपि यथासंख्यं न भवति।

८. **<u>यच्चयत्रयोः ३.३.१४८</u>**

---

406 **२|२|३४**
407 **२|४|६९**
408 **३.३.१४५**
409 तत्रैव ३.१.१
410 तत्रैव ३.१.२
411 तत्रैव ३.१.३
412 तत्रैव ३.१.९१
413 **२|२|३४**

यच्चश्च यत्रश्च इति यच्चयत्रौ इति इतरेतरद्वन्द्वः। तयोः यच्चयत्रयोः इति सप्तम्यन्तं पदम्। अत्र **अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि** [414]इत्यतः अनवक्लृप्त्यमर्षयोः इति **जातुयदोर्लिङ्**[415] इत्यतः लिङ्च अनुवर्तते। अत्र **प्रत्ययः** [416] **परश्च** [417] **आद्युदात्तश्च** [418] **धातोः** [419] इत्येतानि अधिक्रियन्ते।

यच्च यत्र इत्येतयोः उपपदयोः सत्योः अनवक्लृप्त्यमर्षयोः गम्यमानयोः धातोः लृटोऽपवादत्वेन लिङ्प्रत्ययो भवति।

**यच्च तत्रभवान् वृषलं याजयेत्** इत्यत्र अनवक्लृप्त्यवगमात् यच्च इति उपपदसत्वाच्च प्रकृतसूत्रेण यज पूजासंगतिकरणदानेषु इति धातोः लिङ्प्रत्ययो भवति। **यत्र तत्रभवान् वृषलं याजयेत्** इत्यत्र यत्र इति उपपदत्वात् पूर्ववद्प्रक्रिया।

**अल्पाच्तरम्** [420]इति सूत्रेण अनवक्लृप्त्यमर्षौ इति द्वन्द्वसमासे विद्यमानः अमर्षशब्दस्य पूर्वनिपाते कर्तव्ये वह्वचोऽनवुक्लृप्तिशब्दस्य पूर्वनिपातत्वात् लक्षणव्यभिचारो भवति। यथेह पूर्वनिपातलक्षणं व्यभिचारात् स्वविषये न प्रवर्तते, तथैव, यच्चयत्रयोः इति विषयेऽपि यथासंख्यं न भवति।

**जातुयदोर्लिङ्** [421]इत्यस्य प्रकृतसूत्रस्य च समानविषयत्वात् समाननिमित्तत्वाच्च पूर्वसूत्रे यच्चयत्र इति उपपदयोः ग्रहणेनैव अभीष्टं कार्यं सिद्धं भवति। तथापि योगविभागः कृतः किमर्थमिति पृच्छायामुच्यते योगविभागो उत्तरसूत्रे अनुवर्तनार्थम्। तदेवाह काशिकाकारः **योगविभाग उत्तरार्थः।** इति।

## ९. गर्हायाञ्च ३.३.१४९

गर्ह्यते निन्द्यते इति गर्ह कुत्सने इति धातो **गुरोश्च हलः**[422] इति स्त्रियाम् अप्रत्यये ततः टापि गर्हा इति सिद्ध्यति। निन्दा इति तदर्थः। सूत्रे गर्हायाम् इति सप्तम्यन्तं पदम्। च इति अव्ययम्। अत्र **यच्चयत्रयोः** [423]इति सूत्रमनुवर्तते। अत्र **प्रत्ययः** [424] **परश्च** [425] **आद्युदात्तश्च** [426] **धातोः** [427] इत्येतानि अधिक्रियन्ते।

---

[414] तत्रैव **३.३.१४५**
[415] तत्रैव **३.३.१४७**
416 तत्रैव ३.१.१
417 तत्रैव ३.१.२
418 तत्रैव ३.१.३
419 तत्रैव ३.१.९१
[420] तत्रैव **२|२|३४**
[421] ३.३.१४७
422 अ. ध्या ३.३.१३
[423] तत्रैव **३.३.१४८**
424 तत्रैव ३.१.१
425 तत्रैव ३.१.२
426 तत्रैव ३.१.३
427 तत्रैव ३.१.९१

गर्हायां गम्यमानायां यच्च यत्र इत्येतयोः उपपदयोः सत्योः धातोः सर्वलकाराणामपवादत्वेन लिङ्प्रत्ययो भवति।

**यच्च तत्रभवान् वृषलं याजयेत्, ऋद्धो वृद्धः सन् ब्राह्मणः, गर्हामहे, अहो अन्याय्यम् एतत्** इत्यत्र वाक्यात् गर्हा इति गम्यमानात् यच्च इत्युपपदसत्वाच्च प्रकृतसूत्रेण लिङ्प्रत्ययो भवति। तथैव यत्र इति उपपदे **यत्र तत्रभवान् वृषलं याजयेदृद्धो वृद्धः सन् ब्राह्मणः, गर्हामहे, अहो अन्याय्यम् एतत् इति** वाक्ये लिङ्प्रयोगः। उक्तविषये भविष्यति काले क्रियाया अनिष्पत्तौ गम्यमाने **लिङ्निमित्ते लृङ् क्रियातिपत्तौ** इति नित्यमेव लृङ्प्रत्ययेन व्यवहारो भवति।

## १०. चित्रीकरणे च ३.३.१५०

चित्रीकरणे इति सप्तम्यन्तं पदमनुवर्तते। अस्य पदस्य अर्थः आश्चर्यम् इति।तदेव आह काशिकारः **चित्रीकरणम् आश्चर्यम्, अद्भुतम्, विस्मयनीयम्।** च इति अव्ययम्। अत्र **यच्चयत्रयोः** [428]इति सूत्रमनुवर्तते। अत्र **प्रत्ययः** [429] **परश्च** [430] **आद्युदात्तश्च** [431] **धातोः** [432] इत्येतानि अधिक्रियन्ते।

वाक्यात् आश्चर्ये अर्थे गम्यमाने यच्च यत्र इत्येतयोः उपपदयोः सत्योः धातोः सर्वलकाराणामपवादत्वेन लिङ्प्रत्ययो भवति।

**यच्च तत्रभवान् वृषलं याजयेत्**, इत्यस्माद् वाक्यात् आश्चर्यत्वमवगमात, वाक्ये यच्च इत्युपपदसत्वाच्च प्रकृतसूत्रेण लिङ्प्रत्ययो भवति। तथैव यत्र इति उपपदे **यत्र तत्रभवान् वृषलं याजयेत् इति** वाक्ये लिङ्प्रयोगः। उक्तविषये भविष्यति काले क्रियाया अनिष्पत्तौ गम्यमाने **लिङ्निमित्ते लृङ् क्रियातिपत्तौ** इति नित्यमेव लृङ्प्रत्ययेन व्यवहारो भवति।

## ११. उताप्योः समर्थयोर्लिङ् ३.३.१५२

उतश्च अपि च इति उतापी, तयोः उताप्योः इति सप्तम्यन्तं पदम्। समानौ अर्थौ तौ इति बहुव्रीहौ समानशब्दस्य स्थाने समशब्दे निपातिते अतोलोपे शकन्ध्वादित्वाद्वा पररूपत्वे समर्थः इति सिद्ध्यति। तयोः समर्थयोः इति सप्तम्यन्तं पदम्। अत्र **प्रत्ययः** [433] **परश्च** [434] **आद्युदात्तश्च** [435] **धातोः** [436] इत्येतानि अधिक्रियन्ते।

उताप्योः इत्युपपदयोः इव समर्थयोः इत्यर्थे विद्यमाने सति धातोः सर्वलकाराणामपवादत्वेन लिङ्प्रत्ययो भवति।

---

[428] तत्रैव **३.३.१४८**
429 तत्रैव ३.१.१
430 तत्रैव ३.१.२
431 तत्रैव ३.१.३
432 तत्रैव ३.१.९१
433 तत्रैव ३.१.१
434 तत्रैव ३.१.२
435 तत्रैव ३.१.३
436 तत्रैव ३.१.९१

बाढमध्येष्यते इत्यर्थे **उताधीयीत** इति वाक्ये उत इति उपपदसत्वात् प्रकृतसूत्रेण अधि पूर्वकात् इङ् अध्ययने इति धातोः लिङ्प्रत्ययो विधीयते।तथैव अपि इत्युपपदसत्वात् **अप्यधीयीत इति** वाक्ये धातोः लिङ् प्रत्ययः। तथैव **अपि कुर्यात्, उत कुर्यात्** एते उदाहरणे।

**उत दण्डः पतिष्यति? इत्यत्र** उत इत्यस्माद् उपपदात् समर्थारूपमर्थः नावगम्यते अपि तु प्रश्नः प्रच्छादनं च गम्यते। अतः नात्र प्रकृतसूत्रस्य प्रवृत्तिः। तथैव **अपि द्वारं धास्यति?** इति वाक्येऽपि।

## १२. कामप्रवेदनेऽकच्चिति ३.३.१५३

कमु कान्तौ इति धातो काम्यतेऽसौ इति विग्रहे कर्म्मणि घञ्प्रत्यये कामः इति शब्दो निष्पन्नः। इच्छा, अभिलाषः इति तदर्थः। प्रवेदनम् इत्यस्य प्रकाशनम् इत्यर्थः। कामस्य प्रवेदनम् इति कामप्रवेदनं, तस्मिन् कामप्रवेदने इति सप्तम्यन्तं पदम्। इच्छाप्रकाशनम् इति व्युत्पत्तिलभ्योर्थः। अत्र पदमञ्जरीकारः वदति **स्वाभिप्रायाविष्करणं कामप्रवेदनमिति।** न क्वच्चित् इति अक्वच्चित्, तस्मिन् अक्वच्चिति। अत्र **उताप्योः समर्थयोर्लिङ्** [437]इत्यतः लिङ् इत्यनुवर्तते। अत्र **प्रत्ययः** [438] **परश्च** [439] **आद्युदात्तश्च** [440] **धातोः** [441] इत्येतानि अधिक्रियन्ते।

कामप्रवेदनार्थके अर्थात् स्वाभिप्रायाविष्करणार्थके उपपदे सति धातोर्सर्वलकारापवादत्वेन लिङ् प्रत्ययो भवति, क्वचित् इति उपपदे तु न।

**कामो मे भुञ्जीत भवान्** इति वाक्ये कामो इति उपपदसत्वात् प्रकृतसूत्रेण लिङ् विधीयते। अभिलाषो मे भुञ्जीत भवान् इति वाक्ये अभिलाषः इति कामप्रवेदनार्थकात् उपपदसत्वात् लिङ् प्रत्ययो भवति।

**कच्चिज् जीवति ते माता कच्चिज् जीवति ते पिता। माराविद त्वां पृच्छामि कच्चिज् जीवति पार्वती।** इति उदाहरणद्वये तु कच्चित् इति पदप्रयागात् सूत्रस्याप्रवृत्तिः।

## १३. सम्भावनेऽलमिति चेत् सिद्धाप्रयोगे ३.३.१५४

सम्भावनं क्रियासु योग्यताध्यवसानम्, शक्तिश्रद्धानम् वा। योग्यता नाम सामर्थ्यम्, सा येनाध्यवसीयते निश्चीयते तद्योग्यताध्यवसानम्, तदेव सम्भावनमुच्यते। अनाय व्युत्पत्या संभावनम् इति पदस्य ज्ञानम् इत्यर्थः। शक्तिः अर्थात् सामर्थं, सा श्रद्धीयते येन ज्ञानेन तच्छक्तिश्रद्धानम्। सम्भावने इति सप्तम्यन्तं पदम्। न प्रयोगः इति अप्रयोगः। सिद्धोऽप्रयोगोऽस्य स सिद्धाप्रयोगः तस्मिन् सिद्धाप्रयोगे इति सप्तम्यन्तं पदम्। चेत् इति अव्ययम्। अलम् इति अव्ययम्। अलम् इति पर्याप्तवाचकः। इति पदम् अव्ययम्। सम्भावने इति अलमर्थेन विशेष्यते। सिद्धाप्रयोगे इत्यलमो विशेषणम्। अतः सिद्धाप्रयोगः पदस्यार्थः अलम् इति शब्दप्रयोगाभावेऽपि अत्र अलमर्थः प्रतीतिः। अत्र

---

437 तत्रैव **३.३.१५२**

438 तत्रैव ३.१.१

439 तत्रैव ३.१.२

440 तत्रैव ३.१.३

441 तत्रैव ३.१.९१

**उताप्योः समर्थयोर्लिङ्** [442]इत्यतः लिङ् इत्यनुवर्तते। अत्र **प्रत्ययः** [443] **परश्च** [444] **आद्युदात्तश्च** [445] **धातोः** [446] इत्येतानि अधिक्रियन्ते।

सम्भावनाविशिष्टे अलम् इति शब्दप्रयोगं विनैव पर्याप्तविशिष्टसम्भावनार्थे गम्यमाने सति धातोः लिङ्लकारो भवति।

**अपि पर्वतं शिरसा भन्द्यात्** इति उदाहरणवाक्ये सम्भावनाविशिष्टे अलम् इति शब्दाप्रयोगे सत्यपि पर्याप्तविशिष्टसम्भावनार्थोऽवगम्यते, अतः प्रकृतसूत्रेण वाक्यस्थस्य धातोः लिङ्लकारो भवति। तथैव **अपि द्रोणपाकं भुञ्जीत** इति वाक्येऽपि।

**विदेशस्थायी देवदत्तः प्रायेन गमिष्यति ग्रामम्** इति वाक्ये सम्भावनं प्रायशब्दात् प्रतीयमानमस्ति परन्तु अलमर्थस्तु नास्ति। अतः एव सूत्रस्य अप्रवृत्तिः। **अलं देवदत्तो हस्तिनं हनिष्यति** अलं शब्दस्य प्रयोगात् सिद्धाप्रयोगे इति पदसामर्थात् नात्र लिङ्। क्रियातिपत्तौ भूते भविष्यति च नित्यं लृङ् भवति।

उक्तविषये भविष्यति काले क्रियाया अनिष्पत्तौ गम्यमाने **लिङ्निमित्ते लृङ् क्रियातिपत्तौ** इति नित्यमेव लृङ्प्रत्यते **कथं नाम तत्रभवान् वृषलं याजयिष्यति** इति व्यवहारो भवति।

## १४. विभाषा धातौ सम्भावनवचनेऽयदि ३.३.१५५

सम्भावनं क्रियासु योग्यताध्यवसानम्, शक्तिश्रद्धानम् वा। तद् उच्यतेऽनया इति सम्भावनवचनः, तस्मिन् सम्भावनवचने इति सप्तम्यन्तं पदम्। विभाषा इति विकल्पार्थकः प्रथमान्तं पदम्। धातौ इति सप्तम्यन्तं पदम्। न यदि इति अयदि, तस्मिन् अयदौ इति सप्तम्यन्तं पदम्। अत्र **उताप्योः समर्थयोर्लिङ्** [447]इत्यतः लिङ् इति **सम्भावनेऽलमिति चेत् सिद्धाप्रयोगे** [448]इति सूत्रञ्च अनुवर्तते। अत्र **प्रत्ययः** [449] **परश्च** [450] **आद्युदात्तश्च** [451] **धातोः** [452] इत्येतानि अधिक्रियन्ते।

सम्भावनाविशिष्टे अलम् इति शब्दप्रयोगं विनैव पर्याप्तविशिष्टसम्भावनार्थे गम्यमाने सति धातोः लिङ्लकारो भवति, यदि इति उपपदे सति तु न।

---

442 तत्रैव ३.३.१५२
443 तत्रैव ३.१.१
444 तत्रैव ३.१.२
445 तत्रैव ३.१.३
446 तत्रैव ३.१.९१
447 तत्रैव **३.३.१५२**
448 तत्रैव **३.३.१५४**
449 तत्रैव ३.१.१
450 तत्रैव ३.१.२
451 तत्रैव ३.१.३
452 तत्रैव ३.१.९१

पूर्वसूत्रेण नित्ये प्राप्ते विभाषार्थं सूत्रमिदम्। **सम्भावयामि भुञ्जीत भवान्** इत्यत्र प्रकृतसूत्रेण लिङ्। विकल्पपक्षे तु लृटि **सम्भावयामि भोक्ष्यते भवान् इति** व्यवहारो भवति। यदि इति शब्दोपपदे तु प्रकृतसूत्रस्याप्रवृत्तौ **सम्भावनेऽलमिति चेत् सिद्धाप्रयोगे** [453]इति सूत्रेण नित्ये लिङ्लकारे **सम्भावयामि यद् भुञ्जीत भवान्** इति व्यवहारो भवति।

## १५. हेतुहेतुमतोर्लिङ् ३.३.१५६

हिनोति व्याप्नोति कार्य्यमिति विग्रहे हि गतौ वृद्धौ च इति धातोः **कमिमनिजनिगाभायाहिभ्यश्च**[454]इति उणादिसूत्रेण तुप्रत्यये हेतुः इति निष्पन्नः। कारणमिति तदर्थः। सूत्रे हेतुः इति प्रथमान्तं पदम्। हेतुरस्यास्तीति विग्रहे मतुप्प्रत्यये हेतुमान् इति सिद्ध्यति। फलम् इति तदर्थः। हेतुश्य हेतुमान् च इति इतरेतरद्वन्द्वे हेतुहेतुमन्तौ, तयोः हेतुहेतुमतोः इति सप्तम्यन्तं पदम्। कार्यकारणभावः इति तदर्थः। अत्र **विभाषा धातौ सम्भावनवचनेऽयदि** [455]**इत्यतः** विभाषा इति अनुवर्तते। अत्र **प्रत्ययः** [456] **परश्च** [457] **आद्युदात्तश्च** [458] **धातोः** [459] इत्येतानि अधिक्रियन्ते।

हेतुहेतुमद्भावे सति विभाषया धातोः परः सर्वलकारापवादत्वेन लिङ् विधीयते इति सूत्रार्थः।

**दक्षिणेन चेद् यायान्न शकटं पर्याभवेत्** इति सूत्रस्योदाहरणम्। वाक्ये शाकटपर्याभवकार्यं फलमर्थात् कार्यम्। दक्षिणदिशि गमनम् कारणम्। अतः वाक्ये प्रयुक्तस्य या गतिप्रापणयोः इति धातोः लिङ्लकारे यायात् इति प्रयोगः। तथैव पर्याभवेत् इत्यस्यापि।

**उताप्योः समर्थयोर्लिङ्**[460] इत्यतः लिङ् इत्यनुवर्तने सिद्धे पुनः सूत्रे लिङ् ग्रहणं कालविशेषप्रतिपत्त्यर्थम्। तेन भविष्यत्काले एव भवति। **हन्तीति पलायत** इति वाक्ये हननं हेतुः, पलायनं हेतुमत् इति सत्वेपि न लिङ्लकारः, वाक्यस्य वर्तमानकालिकत्वात्। **वर्षति इति धावति** इति वाक्ये वर्षणं हेतुः, सरणं हेतुमत् इति सत्वेपि पूर्ववन्न।

## १६. इच्छार्थेषु लिङ्लोटौ ३.३.१५७

इच्छा अर्थो येषां ते इच्छार्थाः, तेषु इच्छार्थेषु इति सप्तम्यन्तं पदम्। लिङ् च लोट् च इति लिङ्लोटौ इति प्रथमाद्विवचनान्तं पदम्। अत्र **प्रत्ययः** [461] **परश्च** [462] **आद्युदात्तश्च** [463] **धातोः** [464] इत्येतानि अधिक्रियन्ते।

---

[453] तत्रैव **३.३.१५४**
[454]तत्रैव **३. १.७३**
[455] तत्रैव **३.३.१५५**
456 तत्रैव ३.१.१
457 तत्रैव ३.१.२
458 तत्रैव ३.१.३
459 तत्रैव ३.१.९१
[460] तत्रैव **३.३.१५२**
461 तत्रैव ३.१.१
462 तत्रैव ३.१.२
463 तत्रैव ३.१.३

इच्छार्थेषु धातुष्वुपपदेषु सति तद्भिन्नस्य धातोः लिङ्लोटौ विधीयेते।

**इच्छामि भुञ्जीत भवान्** इति **इच्छामि भुङ्क्ताम् भवान्** इति वाक्ये च इच्छामि इति इच्छार्थः धातुः उपपदे अस्ति अतः तद्भिन्नस्य भुज पालनव्यवहारयोः इति धातोः प्रकृतसूत्रेण लिङ्लोटौ विधीयेते। तेन भुञ्जीत इति, भूङ्क्ताम् इति व्यवहारौ।

१७. **लिङ् च ३.३.१५९**

लिङ् इति प्रथमान्तं पदम्। च इति अव्ययम्। अत्र **इच्छार्थेषु लिङ्लोटौ ३.३.१५७** इत्यतः इच्छार्थेषु इति सप्तम्यन्तं पदं, **समानकर्तृकेषु तुमुन्** [465]इत्यतः समानकर्तृकेषु इति सप्तम्यन्तं पदञ्चानुवर्तते। अत्र **प्रत्ययः** [466] **परश्च** [467] **आद्युदात्तश्च** [468] **धातोः** [469] इत्येतानि अधिक्रियन्ते।

इच्छार्थेषु समानकर्तृकेषु धातुषु उपपदेषु धातोः लिङ् प्रत्ययो भवति।

**भुञ्जीय इति इच्छति** वाक्ये भोजनकर्ता इषितृकर्ता एक एव, तथा च इच्छार्थः धातुरपि उपपदे अस्ति। अतः तद्भिन्नस्य भुज पालनव्यवहारयोः इति धातोः प्रकृतसूत्रेण लिङ् विधीयेते।

**इच्छार्थेषु लिङ्लोटौ** [470]**इति** सूत्रेणैव लिङ्लकारे सिद्धे किमर्थं पुनरिदं सूत्रमुच्येत इति पृच्छायां वदति **इच्छार्थेषु लिङ्लोटौ**[471] इति सूत्रं **समानकर्तृकेषु तुमुन्** [472] **इति सूत्रेण** बाध्यते। वासरूपविधिनैवात्र लिङ् भविष्यतीति न वाच्यं यतो हि वासरूपविधिः क्तल्युट्तुमुन्खलर्थेषु प्रतिषिद्धः। तेन बाधितत्वाद्यथा लोड् न भवति, तथा लिङ्गपि न स्यात्। तस्माल्लिङविधानार्थमिदमुच्यते। अथापि वासरूपविधिर्स्याद् एवमपि लिङेव यथा स्याल्लोण्माभूदित्येवमर्थमेतदारब्धव्यमेव।

योगविभाग उत्तरसूत्रे लिङ एवानुवृत्तिर्यथा स्यात् तदार्थं कृतम्। तेन यत्र यत्र अनुवृत्तिर्भवति तत्र तत्र तुमुन्प्रत्ययो न भवति॥

**१८. इच्छार्थेभ्यो विभाषा वर्तमाने ३.३.१६०**

---

464 तत्रैव ३.१.९१
465 तत्रैव **३.३.१४८**
466 तत्रैव ३.१.१
467 तत्रैव ३.१.२
468 तत्रैव ३.१.३
469 तत्रैव ३.१.९१
470 तत्रैव **३.३.१५७**
471 तत्रैव **३.३.१५७**
472 तत्रैव **३.३.१४८**

इच्छा अर्थो येषां ते इच्छार्थाः तेभ्य इच्छार्थेभ्यः इति पञ्चम्यन्तं विभाषा प्रथमान्तं पदम्। वर्तमाने इति सप्तम्यन्तं पदम्। अत्र **लिङ् च** [473]इति लिङ् इति पदमनुवर्तते। अत्र **प्रत्ययः** [474] **परश्च** [475] **आद्युदात्तश्च** [476] **धातोः** [477] इत्येतानि अधिक्रियन्ते।

इच्छार्थेभ्यः धातुभ्यः वर्तमानकाले विभाषया लिङ् प्रत्ययो भवति।

इषु इच्छायाम् इति धातोः वर्तमानकाले वाच्ये लट्प्राप्ते प्रकृतसूत्रेण धातोः इच्छार्थकत्वात् लिङ्प्रत्यये इच्छेत् इति प्रयोगो भवति, विकल्पपक्षे तु लटि इच्छति इति प्रयोगो भवति। वश कान्तौ, कमु कान्तौ इत्येतौ इच्छार्थकौ धातू। तस्माद् अत्रापि तस्य प्रवृत्तिः। तेन **वष्टि, उश्यात्। कामयते, कामयेत** इत्येतानि रूपाणि।.

## १९. <u>लिङ् चौर्ध्वमौहूर्त्तिके ३.३.१६४</u>

मुहूर्ताद् ऊर्ध्वम् इति ऊर्द्धमुहूर्तम् इति निपातनात्पञ्चमीतत्पुरुषसमासः। ऊर्द्धमुहूर्ते भव इति **बह्वचोऽन्तोदात्ताट्ठञ्**[478] इति सूत्रेण ठञ्प्रत्यये, तत उत्तदरपदवृद्धौ ऊर्ध्वमौहूर्तिकः इति सिद्ध्यति। सा उत्तरपदवृद्धिश्च निपातनात् भवति। ऊर्ध्वमौहूर्तिके इति सप्तम्येकवचनान्तं पदम्। लिङ् इति प्रथमैकवचनान्तं पदम्। च इति अव्ययम्। अत्र, **प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च** [479] इत्यतः प्रैषातिसर्गप्राप्तकालेषु इति सप्तम्यन्तं पदमनुवर्तते। अत्र **प्रत्ययः** [480] **परश्च** [481] **आद्युदात्तश्च** [482] **धातोः** [483] इत्येतानि अधिक्रियन्ते।

प्रैषादिष्वर्थेषु एक मुहूर्ताद् उपरि विद्यमानः यः कालः इत्यस्मिन्नर्थे विद्यमानात् धातोः लिङ् भवति, चकाराल्लोडादयः।

**ऊर्ध्वं मुहूर्तात्, उपरि मुहूर्तस्य भवता खलु कटं कुर्यात्** इति वाक्ये प्रैषाद्यर्थत्वं गम्यते तथा च ऊर्ध्वमौहूर्तिकरूपकालोऽपि अवगम्यते। अतः प्रकृतसूत्रेण लिङ्लकारे कुर्यात् इति प्रयुज्यते। चकाराल्लोडादौ **ऊर्ध्वं मुहूर्तात्, उपरि मुहूर्तस्य भवान् खलु करोतु, ऊर्ध्वं मुहूर्तात्, उपरि मुहूर्तस्य भवता खलु कटः कर्तव्यः, करणीयः, कार्यः** इत्येते व्यवहाराः भवन्ति।

## २०. <u>लिङ् यदि ३.३.१६८</u>

---

473 तत्रैव **३.३.१५९**
474 तत्रैव ३.१.१
475 तत्रैव ३.१.२
476 तत्रैव ३.१.३
477 तत्रैव ३.१.९१
478 तत्रैव **४|३|६७**
479 तत्रैव **३.३.१६३**
480 तत्रैव ३.१.१
481 तत्रैव ३.१.२
482 तत्रैव ३.१.३
483 तत्रैव ३.१.९१

लिङ् इति प्रथमैकवचनान्तं पदम्। यच्छब्दस्य यदि इति सप्तम्येकवचनान्तं पदम्। अत्र **कालसमयवेलासु तुमुन्**[484] इत्यतः इत्यनुवर्तते। अत्र **प्रत्ययः** [485] **परश्च** [486] **आद्युदात्तश्च** [487] **धातोः** [488] इत्येतानि

कालसमयवेलासु उपपदेषु सहितेषु यच्छब्दे उपपदे सति धातोः तुमुनोऽपवादत्वेन लिङ् प्रत्ययो भवति।

**कालो यद् भुञ्जीत भवान्** इत्यत्र कालः इति उपपदसहितं यत् इति उपपपदसत्वात् प्रकृतसूत्रेण भुज पालनव्यवहारयोः इति धातोः लुङि भुञ्जीत इति रूपं प्रयुज्यते। **समयो यद् भुञ्जीत भवान्। वेला यद् भुञ्जीत भवान्** इत्येतायोः पूर्ववदेव कार्यम्।

## २१. अर्हे कृत्यतृचश्च ३.३.१६९

अर्हति इति विग्रहे पचाद्यचि अर्हः इति शब्दो निष्पन्नः। तद्योग्यः इति तदर्थः। अत्र तच्छब्देन धात्वर्थः परामृश्यते।अर्हे इति सप्तम्येकवचनान्तं पदम्। कृत्याश्य तृच्च इति इतरेतरद्वन्द्वे कृत्यतृचः इति प्रथमाबहुवचनान्तं पदम्। च इति अव्ययम्। अत्र **प्रत्ययः** [489] **परश्च** [490] **आद्युदात्तश्च** [491] **धातोः** [492] इत्येतानि

अर्हे कर्तरि वाच्ये गम्यमाने वा धातोः कृत्यतृचः प्रत्यया भवन्ति, चकाराल्लिङ् च।

**भवता खलु कन्या वोढव्या, वाह्या, वहनीया। भवान् खलु कन्याया वोढा।** इति वाक्यस्य अर्थः कन्योद्वहने योग्यस्त्वम् इति। वाक्यात् अर्हत्वावगमात् प्रकृतसूत्रेण कृत्यादयः विधीयन्ते। चकारात् लिङ्प्रत्यये **भवान् खलु कन्यां वहेत् इति** व्यवहारः।

## २२. शकि लिङ् च ३.३.१७२

शक्लृ शक्तौ इति धातोः भावे क्विपि शक् इति सिद्ध्यति। तस्य शकि इति सप्तम्यन्तं रूपम्। तच्च प्रकृत्यर्थविशेषणम्। लिङ् इति प्रथमान्तं पदम्। च इति अव्ययम्। अत्र **कृत्याश्च ३.३.१७१ इति** सूत्रात् कृत्याः इति अनुवर्तते। अत्र **प्रत्ययः** [493] **परश्च** [494] **आद्युदात्तश्च** [495] **धातोः** [496] इत्येतानि

शक्यर्थे वाच्ये धातोः लिङ् प्रत्ययो भवति, चकारात् कृत्याश्च।

---

484 तत्रैव **३.३.१६७**
485 तत्रैव ३.१.१
486 तत्रैव ३.१.२
487 तत्रैव ३.१.३
488 तत्रैव ३.१.९१
489 तत्रैव ३.१.१
490 तत्रैव ३.१.२
491 तत्रैव ३.१.३
492 तत्रैव ३.१.९१
493 तत्रैव ३.१.१
494 तत्रैव ३.१.२
495 तत्रैव ३.१.३
496 तत्रैव ३.१.९१

**भवान् खलु भारं वहेत्** इति वाक्यात् इह **भवान् शक्तः** इति अर्थः बुद्ध्यते। अतः शक्यार्थस्य अवबोधात् प्रकृतसूत्रेण वह प्रापणे इति धातोः लिङ्लकारे वहेत् इति प्रयोगः। चकारात् कृदादौ **भवता खलु भारो वोढव्यः, वहनीयः, वाह्यः** इति प्रयोगाः भवन्ति।

## २३. आशिषि लिङ्लोटौ ३.३.१७३

आशीः इत्यस्य अप्राप्तस्य इच्छा इत्यर्थः। यद् किमपि इष्टम् अस्ति परन्तु न प्राप्तम् अर्थात् यन्न च लीलया प्राप्तुं शक्यते, तस्य प्राप्तेः इच्छा आशीरिति पदेनोच्यते। आशिषि इति सप्तम्येकवचनान्तं पदम्। लिङ् च लोट् च इति इतरेतरद्वन्द्वे लिङ्लोटौ इति प्रथमाद्विवचनान्तं पदम्। अत्र **प्रत्ययः** [497] **परश्च** [498] **आद्युदात्तश्च** [499] **धातोः** [500] इत्येतानि

अप्राप्तस्य इच्छां दर्शयितुम् लिङ्लकारः लोट्लकारः च प्रयुज्येते दर्शयितुम् लिङ्लकारस्य लोट्लकारस्य च प्रयोगः भवति।

**ईश्वरः मे विपुलम् आयुष्यम् दद्यात् ईश्वरः मे विपुलम् आयुष्यम् ददातु। भवान् चिरं जीव्यात्, भवान् चिरं जीवतु। मम शत्रुः मृषीष्ट, मम शत्रुः म्रियताम्** इत्येतान्युदाहरणानि।

यः लिङ्लकारः आशीषि अर्थे प्रयुज्यते, तस्य निर्देशः आशीर्लिङ्लकारः नाम्ना क्रियते। विधिलिङ्लकारस्य अपेक्षया अस्य रूपाणि भिन्नानि भवन्ति, यतः **लिङ्गाशिषि**[501] इत्यनेन आशीर्लिङ्लकारस्य प्रत्ययाः आर्धधातुकसंज्ञकाः भवन्ति। लोट्लकारस्य विषये एतादृशः भेदः नास्ति, अतः लोट्लकारस्य आशीषि अर्थे अपि भिन्नं नाम न दीयते।

**लोट्लकारः**

## २४. लोट् च ३.३.१६२

लोट् इति प्रथमैकवचनान्तं पदम्। च इति अव्ययम्। अत्र **विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्**[502] इति सूत्रात् विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु इति सप्तमीबहुवचनान्तं पदमनुवर्तते। अत्र **प्रत्ययः** [503] **परश्च** [504] **आद्युदात्तश्च** [505] **धातोः** [506] इत्येतानि

---

497 तत्रैव ३.१.१
498 तत्रैव ३.१.२
499 तत्रैव ३.१.३
500 तत्रैव ३.१.९१
501 तत्रैव **३|४|११६**
502 तत्रैव **३|३|१६१**
503 तत्रैव ३.१.१
504 तत्रैव ३.१.२
505 तत्रैव ३.१.३
506 तत्रैव ३.१.९१

विधिः, निमन्त्रणम्, आमन्त्रणम्, अधीष्टम्, सम्प्रश्नः, प्रार्थना इत्येतेषु अर्थेषु धातोः परः आद्युदात्तः लोट् प्रत्ययः भवति।

लोट्लकारस्य प्रयोगः सामान्यरूपेण प्रवर्तनायाम् क्रियते। प्रवर्तना अर्थात् केनापि कथं कार्यं क्रियेत इत्यस्मिन् विषये कृतम् बोधनम्। एतत् बोधनम् अनेन सूत्रेण षट्सु अवस्थासु विभाजितम् अस्ति विधिः, निमन्त्रणम्, आमन्त्रणम्, अधीष्टम्, सम्प्रश्नः, तथा प्रार्थना।

**विधिर्नाम** प्रेरणा आज्ञा वा। सामान्यरूपेण भृत्यं सेवकं वा प्रति यादृशः व्यवहारः क्रियते, तादृशं व्यवहारम् दर्शयितुम् लोड्लकारः प्रयुज्यते। यथा राजा सेवकं ब्रूते वस्त्रं क्षालय।

**निमन्त्रणम्** इत्यस्यार्थः श्राद्धभोजनादिषु दौहित्रादेः प्रवर्तनम् इति। यथा इह श्राद्धे भवान् भुङ्क्ताम्। निमन्त्रणस्य स्वीकारः एव कर्तव्यः, तस्य अस्वीकारं न कर्तुं शक्यते।

**आमन्त्रणम्** इत्युक्ते कामचारानुज्ञा। यथा यथेच्छम् इह भवान् भुङ्क्ताम्। आमन्त्रणस्य स्वीकारः अपि कर्तुं शक्यते, अस्वीकारः अपि कर्तुं शक्यते, अत यथेच्छम् इति प्रयुक्तम् अस्ति।

**अधीष्टम्** इत्यस्य सत्कारपूर्वकः व्यापारोऽर्थः। यथा मम पुत्रम् अध्यापयतु भवान्!।

**सम्प्रश्नः** नाम कर्तव्यअकर्तव्यविषयकः प्रश्नः। यथा किम् सः व्याकरणम् पठतु?

**प्रार्थना** इति याचना पर्य्यायः। यथा भवान् मे अन्नं ददातु।

विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्[507] इत्यनेन लिङ्लकारस्य प्रयोगः अपि एतेषु सर्वेषु अर्थेषु एव क्रियते। अतः एतेषु अर्थेषु लोट्लकारः तथा विधिलिङ्लकारः समानार्थिनौ स्तः।

## २५. प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ३|३|१६३

प्रेषणं प्रैषः। कामचाराभ्यनुज्ञानम् अतिसर्गः। निमित्तभूतस्य कालस्य अवसरः प्राप्तकालता। प्रैषश्च अतिसर्गश्च प्राप्तकालश्च इति इतरेतरद्वन्द्वे प्रैषातिसर्गप्राप्तकालाः तेषु प्रैषातिसर्गप्राप्तकालेषु इति सप्तमीबहुवचनान्तं पदम्। कृत्याः इति प्रथमाबहुवचनान्तं पदम्। च इति अव्ययम्। अत्र **प्रत्ययः [508] परश्च [509] आद्युदात्तश्च [510] धातोः [511]** इत्येतानि

पैषादिष्वर्थेषु धातोः कृत्यसंज्ञकाः प्रत्ययाः भवन्ति, चकाराल्लोट् च।

**खल्वपि करोतु कटं भवानिह प्रेषितः, भवानतिसृष्टह्, भवतः प्राप्तकालः कटकरणे** इत्येतानि उदाहरणानि।

---

507 तत्रैव ३|३|१६१

508 तत्रैव ३.१.१

509 तत्रैव ३.१.२

510 तत्रैव ३.१.३

511 तत्रैव ३.१.९१

अविशेषेण विहिताः कृत्याः ते प्रैषादिषु भविष्यन्ति, अन्यत्र च अतः किमर्थं प्रैषादिष्वर्थेषु कृत्या विधीयन्ते, इति पृच्छायामुच्यते प्रैषादिषु कृत्यानां वचनं प्रैषादिष्वेव कृत्या यथा स्युरिति इति नियमार्थम् कृतमस्ति। न हि प्रैषादिष्वर्थेष्वेव कृत्या इष्यन्ते, बुसोपेन्ध्यं तृणोपेन्ध्यम्, घनघात्यम् इत्यादौ अप्रैषादिष्वर्थेष्वपि अविशेषेण भवन्ति इति प्रैषादिषु कृत्यानां वचनं नियमार्थमिति चेत्तदनिष्टं प्राप्नोति। अयं प्रैषादिष्वर्थेषु लोड्विधीयते स विशेषविहितः सामान्यविहितान् कृत्यान्बाधेत्। अतः अप्राप्तस्य विधानं क्रियते अनेन सूत्रेण। स्त्र्यधिकारे वर्तमानात् वासरूपविधेःस्त्रियाः प्राग् प्रवृत्तिकारणात् वास्वरूपविधिना अत्र कृत्या अपि भविष्यन्ति इति न वक्तव्यम्।

## २६. <u>इच्छार्थेषु लिङ्लोटौ ३.३.१५७</u>

**a.** इच्छा अर्थो येषां ते इच्छार्थाः, तेषु इच्छार्थेषु इति सप्तम्यन्तं पदम्। लिङ् च लोट् च इति लिङ्लोटौ इति प्रथमाद्विवचनान्तं पदम्। अत्र **प्रत्ययः** [512] **परश्च** [513] **आद्युदात्तश्च** [514] **धातोः** [515] इत्येतानि अधिक्रियन्ते।

**b.** इच्छार्थेषु धातुष्वुपपदेषु सति तद्भिन्नस्य धातोः लिङ्लोटौ विधीयेते।

**इच्छामि भुञ्जीत भवान्** इति **इच्छामि भुङ्क्ताम् भवान्** इति वाक्ये च इच्छामि इति इच्छार्थः धातुः उपपदे अस्ति अतः तद्भिन्नस्य भुज पालनव्यवहारयोः इति धातोः प्रकृतसूत्रेण लिङ्लोटौ विधीयेते। तेन भुञ्जीत इति, भूङ्क्ताम् इति व्यवहारौ।

## २७. <u>आशिषि लिङ्लोटौ ३.३.१७३</u>

आशीः इत्यस्य अप्राप्तस्य इच्छा इत्यर्थः। यद् किमपि इष्टम् अस्ति परन्तु न प्राप्तम् अर्थात् यन्न च लीलया प्राप्तुं शक्यते, तस्य प्राप्तेः इच्छा आशीरिति पदेनोच्यते। आशिषि इति सप्तम्येकवचनान्तं पदम्। लिङ् च लोट् च इति इतरेतरद्वन्द्वे लिङ्लोटौ इति प्रथमाद्विवचनान्तं पदम्। अत्र **प्रत्ययः** [516] **परश्च** [517] **आद्युदात्तश्च** [518] **धातोः** [519] इत्येतानि

अप्राप्तस्य इच्छां दर्शयितुम् लिङ्लकारः लोट्लकारः च प्रयुज्येते दर्शयितुम् लिङ्लकारस्य लोट्लकारस्य च प्रयोगः भवति।

**ईश्वरः मे विपुलम् आयुष्यम् दद्यात् ईश्वरः मे विपुलम् आयुष्यम् ददातु। भवान् चिरं जीव्यात्, भवान् चिरं जीवतु। मम शत्रुः मृषीष्ट, मम शत्रुः म्रियताम्** इत्येतान्युदाहरणानि।

---

512 तत्रैव ३.१.१
513 तत्रैव ३.१.२
514 तत्रैव ३.१.३
515 तत्रैव ३.१.९१
516 तत्रैव ३.१.१
517 तत्रैव ३.१.२
518 तत्रैव ३.१.३
519 तत्रैव ३.१.९१

आशीषि अर्थे लोट्लकारस्य तु **तुह्योस्तातङाशिष्यन्यतरस्याम्** [520] इत्यनेन वैकल्पिकः तातङ् आदेशः अपि भवति। यथा पठतु.पठतात्, लिख.लिखतात् आदयः। यत्र लोट्लकारः अन्येषु अर्थेषु प्रयुज्यते, तत्र तु एतादृशः आदेशः न भवति।

## २८. स्मे लोट् ३.३.१६५

स्म इत्यस्य सप्तम्यन्तं रूपं स्मे इति। लोट् इति प्रथमान्तं रूपम्। सूत्रेऽस्मिन् लिङ् **चौर्ध्वमौहूर्त्तिके ३.३.१६४** इत्यतः ऊर्ध्वमौहूर्तिके इति सप्तम्येकवचनान्तं पदम्, **प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ३.३.१६३** इत्यतः प्रैषातिसर्गप्राप्तकालेषु इति सप्तम्यन्तं पदञ्चानुवर्तते। मुहूर्ताद् ऊर्ध्वम् इति ऊर्द्धमुहूर्तम् इति निपातनात्पञ्चमीतत्पुरुषसमासः। ऊर्द्धमुहूर्ते भव इति **बह्वचोऽन्तोदात्ताट्ठञ्** ४|३|६७ इति सूत्रेण ठञ्प्रत्यये, तत उत्तदरपदवृद्धौ ऊर्ध्वमौहूर्तिकः इति सिद्ध्यति। सा उत्तरपदवृद्धिश्च निपातनात् भवति। अत्र **प्रत्ययः** [521] **परश्च** [522] **आद्युदात्तश्च** [523] **धातोः** [524] इत्येतानि अधिक्रियन्ते।

प्रैषादिष्वर्थेषु एक मुहूर्ताद् उपरि विद्यमानः यः कालः इत्यस्मिन्नर्थे स्म इत्युपपदे सति धातोः परः लिङ्कृत्यानामपवादत्वेन नित्यं लोट् भवति।

**ऊर्ध्वं मुहूर्ताद् भवान् कटं करोतु स्म** इति वाक्ये प्रैषाद्यर्थत्वं गम्यते तथा च ऊर्ध्वमौहूर्तिकरूपकालोऽपि अवगम्यते। अतः प्रकृतसूत्रेण डुकृञ् करणे इति धातोः लोट्लकारे करोतु इति प्रयोगः।

## २९. अधीष्टे च ३.३.१६६

अधीष्टम् इत्यस्य सत्कारपूर्वकः व्यापारोऽर्थः। अधीष्टे इति सप्तम्यन्तं पदम्। च इति अव्ययम्। अत्र स्मे लोट् ३.३.१६५ इत्यतः स्मे इति अनुवर्तते। अत्र **प्रत्ययः** [525] **परश्च** [526] **आद्युदात्तश्च** [527] **धातोः** [528] इत्येतानि अधिक्रियन्ते।

अधीष्टे अर्थे स्म इत्युपपदे लिङोऽपवादतया लोट् विधीयते।

**अङ्ग स्म राजन् माणवकमध्यापय** इति उदाहरणे अधीष्टारूपं व्यापारो गम्यते, अपि च स्म इति उपपदमस्ति। अतः प्रकृतसूत्रेण **विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्** इति लिङोऽपवादत्वेन लोटि अध्यापय इति प्रयोगः।

---

520 तत्रैव ७|१|३५
521 तत्रैव ३.१.१
522 तत्रैव ३.१.२
523 तत्रैव ३.१.३
524 तत्रैव ३.१.९१
525 तत्रैव ३.१.१
526 तत्रैव ३.१.२
527 तत्रैव ३.१.३
528 तत्रैव ३.१.९१

## ३०. क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः ३.४.२

क्रियायाः समभिहारः क्रियासमभिहारः। पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः। क्रियासमभिहारे इति सप्तम्येकवचनान्तं पदम्। क्रियासमभिहारे इति धात्वर्थविशेषणम्। लोट् इति प्रथमैकवचनान्तं पदम्। लोटः इति षष्ठ्येकवचनान्तं पदम्। हिश्च स्वश्च इति हिस्वौ प्रथमाद्विवचनान्तं पदम्। वा इति अव्ययम्। च इति अव्ययम्। तश्च ध्वम् च इति तध्वमोः इति षष्ठीद्विवचनान्तं पदम्। अत्र **धातुसम्बन्धे प्रत्ययाः ३.४.१** इत्यतः धातुसम्बन्धे इति सप्तम्यन्तं पदमनुवर्तते। अत्र **प्रत्ययः** [529] **परश्च** [530] **आद्युदात्तश्च** [531] **धातोः** [532] इत्येतानि अधिक्रियन्ते।

**समभिहारविशिष्टक्रियावचनाद् धातोः लोट् प्रत्ययो भवति सर्वेषु कालेषु। सर्वलकाराणाम् अपवादः तस्य च लोटो हिस्वौ इत्येतावादेशौ भवतः। तध्वंभाविनस्तु वा भवतः।** इति काशिकाकारः

सूत्रस्यार्थबोधनाय योगविभागः क्रियते। तत्र च

**क्रियासमभिहारे लोडिति** प्रथमं वाक्यम्। अस्यार्थः पौनः पुन्ये भृशार्थे च द्योत्येऽर्थात् क्रियासमभिहारविसिष्टक्रियावृत्तेर्धातोः सर्वेषु कालेषु सर्वलकारापवादत्वेन लोट् भवति।

**लोटो हिस्वौ** इति द्वितीयं वाक्यम्। अत्र **क्रियासमभिहारे लोड् इति** अनुवर्तेते। तेन पौनः पुन्ये भृशार्थे च द्योत्येऽर्थात् क्रियासमभिहारविसिष्टक्रियावृत्तेर्धातोः विहितस्य लोटो हिस्वावादेशौ स्त इत्यर्थो लभ्यते। अत्र साक्षात् लोट् इत्यत्र हिस्वौ विधीयेते। न तु तिङः स्थले। अत आह **तिङामपवाद** इति।

हिस्वयोरुभयोरपि तिङ्भन्नत्वात् **तङानावात्मनेपदम्** इति सूत्रेण आत्मनेपदसंज्ञा न भवति अपितु लादेशत्वात् **लः परस्मैपदम्** इति सूत्रेण परस्मैपदत्वं प्राप्नोति। तथा सति हेः परस्मपैदत्वं, स्वादेशस्य त्वात्मनेपदत्वम् इतीष्टा व्यवस्था न सिध्येत्। अस्य स्वादेशस्य तङ्प्रत्याहारे प्रविष्टत्वाऽभावेन **तङानावात्मनेपदम्** इत्यस्य अप्रवृत्तिर्भवति। यतो हि **तिप्तस्झिसिप्थस्थमिब्वस्मस् तातांझथासाथांध्वमिड्वहिमहिङ्**[533] इति सूत्रोपात्तेषु ताऽऽतामादिष्वेव तङ्संज्ञा भवति। तत्र च अनयोर्हिस्वयोः अन्तर्भावः नास्ति। तङ्संज्ञाभावात् तद्व्यापकीभूता तिङ्संज्ञा अपि न भवति। अतः तृतीयं वाक्यम् **तौ च हिस्वौ क्रमेण परस्मैपदसंज्ञात्मनेपदसञ्ज्ञौ स्तस्तिङ्सञ्ज्ञौ च इति**। अत्र **लोटो हिस्वौ** इति द्वितीयवक्यं, **क्रियासमभिहारे लोड्** इति प्रथमवाक्याल्लोडित्यनुवृत्य स्थानषष्ठ्या विपरिणतं लोडः इति पदञ्च अनुवर्तते। लोटो हिस्वौ इति द्वितीयवाक्याद्धिस्वावित्यनुवृत्तं धर्मपरमाश्रीयते। तेन लोडादेशौ हिस्ववद्भवत इत्यर्थः लभ्यते। कौ भवतः इत्याकाङ्क्षायां पूर्ववाक्योपस्थितौ हिस्वाविति गम्यते।

चतुर्थवाक्यं भवति **तध्वमोः हिस्वौ** इति। स्थानषष्ठीमाश्रित्यलोडादेश तध्वमोः स्थानषष्ठी नास्ति किंतु विषयविषयिभावः अस्य षष्ठर्थः। तेन तध्वमोर्विषये लोटो हिस्वौ भवतः, पक्षे तध्वमाविति वाक्यर्थः।

---

529 तत्रैव ३.१.१

530 तत्रैव ३.१.२

531 तत्रैव ३.१.३

532 तत्रैव ३.१.९१

533 तत्रैव **३.४.७८**

सहचरितासहचरितयोः सहचरितस्यैव ग्रहणमिति परिभाषया ध्वंसाहचर्याच्च मध्यमपुरुषबहुवचनमेव तशब्दो गृह्यते नान्यः।

हिस्वयोः तिङ्वद्भावः, परस्मैपदात्मनेपदसंज्ञा च अतिदिश्यते, न तु पुरुषवचनव्यवस्था। अन्यथा हिस्वयोः मध्यमपुरुषैकवचनसंज्ञे स्यातां तर्हि युष्मत्सामानाधिकरण्ये एकत्वे च सत्येवलोटो हिस्वौ स्याताम्, अन्यत्र तु यथायथं तिबाद्यादेशाः स्युः। तथा सति लोटो हिस्वविधानमनर्थकं स्याद्।

तथा च सकलपुरुषवचनविषये हिर्भवति, स च कर्तरि परस्मैपदिभ्यश्च एव भवति। एवञ्च सकलपुरुषवचनविषये स्व भवति भावकर्मकर्तृष्वर्थेषु आत्मनेपदिभ्यो एव।

उदाहरणस्तु अधः व्याख्यायते।

## ३१. समुच्चयेऽन्यतरस्याम् ३.४.३

अनेकक्रियाध्याहारः समुच्चयः। समुच्चये इति सप्तम्यन्तं पदम्। अन्यतरस्याम् इति अव्ययम्। अत्र **क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः** [534]इत्यतः लोट् लोटो हिस्वौ वा च तध्वमोः इत्येतानि पदानि, **धातुसम्बन्धे प्रत्ययाः** [535] इत्यतः धातुसम्बन्धे इति सप्तम्यन्तं पदञ्चानुवर्तन्ते। अत्र **प्रत्ययः** [536] **परश्च** [537] **आद्युदात्तश्च** [538] **धातोः** [539] इत्येतानि अधिक्रियन्ते।

समुच्चीयमानक्रियावचनाद् धातोरन्यतरस्यां लोट् प्रत्ययो भवति, तस्य लोटो हिस्वौ आदेशौ भवतः। तध्वंभाविनस्तु वा भवतः।

उदाहरणसमन्बयस्तु अधः दीयते।

## ३२. यथाविध्यनुप्रयोगः पूर्वस्मिन् ३.४.४

विधिमनतिक्रम्य इति अव्ययीभावसमासे यथाविधि इति अव्ययं निष्पन्नम्। अनुप्रयोगः इति प्रथमैकवचनान्तं पदम्। पूर्वस्मिन् इति सप्तम्येकवचनम्। एतत्पदेन **क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः**[540] इति सूत्रं, **समुच्चयेऽन्यतरस्याम्** [541] इति सूत्रञ्च सम्बद्ध्यते। अत्र **प्रत्ययः** [542] **परश्च** [543] **धातोः** [544] इत्येतानि अधिक्रियन्ते।

---

[534] **तत्रैव ३.४.२**
[535] **तत्रैव ३.४..१**
536 तत्रैव ३.१.१
537 तत्रैव ३.१.२
538 तत्रैव ३.१.३
539 तत्रैव ३.१.९१
540 तत्रैव ३.४.२
541 तत्रैव ३.४.3
542 तत्रैव ३.१.१
543 तत्रैव ३.१.२

यस्माद् धातोः लोड् विहितः स एव धातुरनुप्रयोगः क्रियते।

**धातुसम्बन्धे प्रत्ययाः**[545] इत्यतः धातुसम्बन्धे इति अनुवर्तनात् धातुसम्बन्धे प्रत्ययविधानादेव अनुप्रयोगे सिद्धे यथाविध्यर्थं पृथक् सूत्रकरणं।

पुनःपुनरतिशयेन वा याति इति विग्रहे या प्रापणे इति धातोः **क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः**[546] इति सूत्रेण लोटि लकारधात्वोश्च परस्मैदित्वात् हि इत्यादेशे याहि इति स्थिते **क्रियासमभिहारे द्वे वाच्ये** इति वार्तिकेन द्वित्वे याहि याहि इति स्थिते प्रकृतसूत्रेण प्रकृतिभूतस्य या प्रापणे इति धातोःअनुप्रयोगे लट्लकारविवक्षायायां प्रथमपुरुषैकवचने याति इति कृते **याहि याहीति याति** इति प्रयोगो सिद्ध्यति। एककर्तृकं वर्तमानकालिकं यानं यातीत्यस्य वाक्यस्यार्थः। इतिशब्दस्त्वभेदान्वये तात्पर्यं ग्राहयति। पुनःपुनरतिशयेन यत् यानं तदात्मकम् एककर्तृकं वर्तमानकालिकं यानं यातीति अस्य वाक्यस्यार्थः।

## ३३. समुच्चये सामान्यवचनस्य ३.४.५

समुच्चये इति सप्तम्यन्तं पदम्। सामान्यमुच्यते अनेनेति सामान्यवचनः, तस्य सामान्यवचनस्य इति षष्ठ्यन्तं पदम्। पूर्वसूत्रात् अनुप्रयोगः इति अनुवर्तते। अत्र **धातोः** [547] इति सूत्रमधिक्रियते।

समुच्चये लोड्विधौ सामान्यार्थस्य धातोरनुप्रयोगः भवति।

सक्तून्पिब धानाः खादेत्यभ्यवहरति इति उदाहरणे पिव खाद इति धातुसमुच्चयो विद्यते। अतः **यथाविध्यनुप्रयोगः पूर्वस्मिन्**[548] इत्यनेन अनुप्रयोगे अनियमे प्राप्ते प्रकृतसूत्रेण धातुद्वयस्य सामान्यार्थयुक्तस्य अभि अव इति पूर्वकस्य हृ धातोः अभ्यवहरति इत्यस्य अनुप्रयोगः क्रियते। किञ्च धातूनां समुच्चयत्वात् प्रत्येकस्मात् धातोः **समुच्चयेऽन्यतरस्याम्**[549] इति सूत्रेण लोटि लोटस्स्थाने हि इत्यादेशे पिव खाद इति रूपे भवतः। विकल्पपक्षे तु **सक्तून् पिबति, धानाः खादति, अन्नं भुङ्क्ते** इति व्यवहाराः।

## लेट् लकारः

व्याकरणे शास्त्रे दश लकाराः वर्तन्ते। तान् दशलकारान् बोधसौकर्याय ग्रन्थकर्त्रा टितः ङितश्चेति भेदेन द्विधा विभागः कृतः। तत्र लट् लिट् लुट् लृट् लेट् लोट् इति षट् टितः लकाराः वर्तन्ते। लङ, लिङ्, लुङ लृङ् इति चत्वारो ङितो लकारा वर्तन्ते इति विभागः। टिल्लकारेषु लेट् लकारो छन्दसि एव प्रयुज्यते। अधुना तत् विमर्श्यते।

## ३४. लिङर्थे लेट् ६.४.७

544 तत्रैव ३.१.९१
545 तत्रैव तत्रैव ३.४..१
546 तत्रैव तत्रैव ३.४.२
547 तत्रैव ३.१.९१
548 तत्रैव ३.४.४
549 तत्रैव ३.४.3

लिङः अर्थः लिङर्थः, तस्मिन् लिङर्थे इत सप्तम्येकवचनान्तं पदम्। यस्मिन् यस्मिन् अर्थे लिङ्लकारो विधीयते ते लिङर्थाः।तच्च विध्यादिः, **हेतुहेतुमतोर् लिङ्**[550] इत्येवम् आदिः। लेट् इति प्रथमैकवचनान्तं पदम्। अत्र **प्रत्ययः**[551] **परश्च**[552] **धातोः**[553] इत्येतानि अधिक्रियन्ते।

यत्र लिङ् विधीयते तत्र छन्दसि विषये लेट् प्रत्ययो विभाषा भवति।

**जोषिषत् तारिषत्। मन्दिषत्। नेता इन्द्रो नेषत्। तक्षिषत्** इत्येतानि उदाहरणानि।

जुषी प्रीतिसेवनयोः इति धातो **लिङर्थे लेट्** इति लेट्प्रत्यये सिपि सिप इकार उच्चारणार्थत्वात् लोपे **लेटोऽडाटौ**[554] इति अटि **इतश्च लोपः परस्मैपदेषु**[555] इति लेट्सम्भन्धिनः इकारस्य परस्मैपदविषयस्य लोपे **आर्धधातुकस्येड्वलादेः**[556] इति इडागमे, लघूपधगुणे, **आदेशप्रत्यययोः**[557] इति षत्वे **जोषिषत्** इति सिद्ध्यति।

## ३५. <u>उपसंवादाशङ्कयोश्च ३.४.८</u>

उपपूर्वकात् संपूर्वकाच्च वद परिभाषणे इति धातोः घञ्प्रत्यये उपसंवादः इति शब्दो निष्पन्नः। परिभाषणम्; कर्तव्ये पणबन्धः इति उपसंवादशब्दस्येमौ पर्यायौ बोधव्यौ। कारणतः कार्यानुसरणं तर्कः, उत्प्रेक्षा वा आशङ्काशब्दस्यार्थः। उपसंवादश्च आशंका च इति इतरेतरद्वन्द्वे उपसंवादाशंकौ, तयोः उपसंवादाशंकयोः इति सूत्रे सप्तमीद्विवचनान्तं पदम्। च इति अव्ययम्। अत्र **छन्दसि लुङ्लङ्लिटः**[558] इत्यतः छन्दसि इति, **लिङर्थे लेट्**[559]इत्यतः लेट् इति च अनुवर्तते। अत्र **प्रत्ययः**[560] **परश्च**[561] **आद्युदात्तश्च**[562] **धातोः**[563] इत्येतानि अधिक्रियन्ते।

उपसंवादे आशङ्कायां च गम्यमानायां छन्दसि विषये लेट् प्रत्ययो भवति।

**अहम् एव पशूनामीशै, मदग्रा एव वो ग्रहा गृह्यान्तै** इति वाक्यास्य उपसंवादत्वात् छन्दसि लेट्लकारो विधीयते। **नेज्जिह्मायन्त्यो नरकं पताम इति वाक्यस्य** जिह्माचरणेन नरकपातः आशङ्क्यते इति अर्थः।अतः आशंकायाम् गम्यमानायां प्रकृतसूत्रेण लेट् विधीयते।

---

550 तत्रैव **३|३|१५६**
551 तत्रैव ३.१.१
552 तत्रैव ३.१.२
553 तत्रैव ३.१.९१
554 तत्रैव **३|४|९४**
555 तत्रैव **३.४.९७**
556 तत्रैव **७|२|३५**
557 तत्रैव **८.३.५९**
558 तत्रैव ३|४|६
559 तत्रैव ३|४|७
560 तत्रैव ३.१.१
561 तत्रैव ३.१.२
562 तत्रैव ३.१.३
563 तत्रैव ३.१.९१

# उपसंहारः

**काशिकावृत्तेः तृतीयाध्ययस्थ लकारसूत्राणांमध्ययम्** इति शीर्षकयुक्तः मदीयः शोधप्रबन्ध चर्तुरभिरध्यायैः व्यभज्यते।

**प्रथमोध्याये** वर्तमानो लकाराणां सूत्राणां सृष्टुरुपेण प्रतिपादितम्। वर्तमानोऽर्थे वर्तमानकालो भवति इति सामान्या ज्ञानं छात्रैः ज्ञायन्ते । **वर्त्तमान लट्**[564] इति सूत्रेण वर्तमानकाले सामान्यरुपेण लड लकार भवति । **अपरोक्षे च** [565]**,लट् स्मे**[566] च इत्यादयः भूतानद्यतने परोक्षार्थे धातोः परः लड भवति। अस्मिन्नध्याये विशिष्टतया वर्तमानकालनां सूत्राणां प्रतिपादितं वर्तते .।

**द्वितीयोऽध्याये** भूत लकाराणां सूत्राणां प्रयोगः दृश्यते। अत्र च भूतकालः **सामान्य, अनद्यतनः, परोक्षः** इति भेदेन त्रिधा विभज्यते। **परोक्ष लिट्** [567]इति सूत्रेण परोक्षानद्यतने वर्तमानक्रियावाचकात् धातोः लिट् स्यात्। **अनद्यतने लङ्**[568] इति सूत्रेण अनद्यतनोऽभूतार्थे लङ् लकारो भवति ।**लुङ्**[569] सामान्य भूतकाले धातोः लुङ् लकारो भवति । तथैव **पुरि लुङ् चास्मे**[570] इत्यनेन सूत्रेण स्मशब्दो रहित पुराशब्द उपपदे अनद्यतनः भूतकाले धातोः लट्, लुङ् लङ् लिट् लकाराः विकल्पेन भवति । यथा- लट्- **रथेनायं पुरा याति,** लुङ्- **रथेनायं पुराऽयासीत्।** लङ्- **रथेनायं पुराऽयात्,।** लिट्- **रथेनायं पुता ययौ। माङिलुङि**[571] इत्यनेन सूत्रेण माङ् शब्द उपपदे धातोः लुङ्, लिङ्, लोट् प्रत्ययाः भवति। यथा- मा कार्षीत्, मा हर्षीत्।

---

[564] अष्टा 3.2 123
[565] अष्टा. 3.2.119
[566] अष्टा 3.2 118
[567] अष्टा3.2.115
[568] अष्टा 3.2.11
[569] अष्टा 3.2.110
[570] अष्टा 3.2.122
[571] अष्टा 3.3.175

**तृतीयोऽध्याये** भविष्यतलकाराणां चर्चा कृता ।सामान्यतः भविष्यतकालस्य द्विधा विभाज्यते ।तथा **सामान्य भविष्यतः,अनद्यतनो भविष्यत** च। **अनद्यतने लुट्**[572] इत्यनेन सूत्रेण अनद्यतनार्थे लुड् लकारो भवति। **भविष्यति लृट्**[573] इत्यनेन सूत्रेण सामान्य भविष्यदर्थेवृत्तेधातोर्लृड् भवति। अत्र अन्यनि लृट् लकाराणां सूत्राणां प्रतिपादं क्रियते । यथा- **लृट् शेषे च** [574] अद्यतनभविष्यतकाले व्यामिश्र काले लुट् प्रयोगःन भवति ,अत्र लृट् लकारो भवति। सामान्य भविष्यत्काले लृट् लकारस्य प्रयोगः भवति। **अभिज्ञावचने लृट्** [575] अनेन सत्रेण अभिज्ञावचन अर्थात् स्मृतिशब्द उपपदे अनद्यभूतकाले लृड लकारो भवति।

**चतुर्थोऽध्याये** सामान्य वर्त्तमानकालस्य अबशिष्टांश लकाराणां अत्र प्रयोगः कृतः ।यथा विधिलिङ्, आशीर्लिङ् च। **विधि-सम्प्रश्न-प्रार्थनेषु**[576] इत्यनेन सूत्रेण सम्प्रश्नःसंप्रधारणा,सम्प्रार्थनं याचनं ,इष्टार्थाशंसनं च एषु सर्वत्र लिङ् भवति ।**आशिषि लिङ्लोटौ**[577] इत्यनेन सूत्रेण लिङ् लकारो भवति .। आशीः इत्यस्यार्थः भवति अप्राप्तस्य प्राप्तार्थं आत्मानः इच्छा, न तु आशीर्वादः न्निमित्तम् .।इत्यर्थे लिङ तथा लड लकारस्य प्रयोगः भवति। यथा च लोट्- **चिरं जीवतु भवान्**। लिङ् –**आयुष्यं भूयात्।** अस्मन् अध्याये लिङ् लकारस्यापि व्याख्या कृता। **विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्**[578] इत्यनेन सूत्रेण विधि,निमन्त्रण,आमन्त्रण,अधीष्ट,संप्रश्न तथा प्रार्थनार्थे लिङ् लकारो भवति .।

1. **विधिः**- विधिः इत्यस्यार्थः भवति- कश्चनः व्यक्तिम् आदेशानुसारेण स्वकर्मणिः कार्यं कारयति। उदाहरणम् –**वस्त्रं क्षालयेः।**
2. **मिमन्त्रणः-** श्राद्धादि कार्येषु भोजनार्थं आहानम्। यथा-**इह श्राद्धे भवान् भूञ्जीत।**
3. **आमन्त्रणम्-** य़त्र कार्यस्य विधिपूर्वको न भवति तत्र इच्छानुसारेण कार्यस्य प्रवृतिः भवति तत् कामाचारनुज्ञां **आमन्त्रणम्** इति उत्यते।
4. **अधीष्टः-** सत्करपूर्वकं व्यापारम् **अधीष्टः** इति उत्यते। यथा- **भवान् माणवकम् अध्यापयेत्** ।
5. **प्रार्थना-** पार्थना इत्यस्यार्थः भवति –याचति। अर्थात् **भवान् मे अन्नं दद्यात्** ।विधि ,प्राथना ,इद्यादि प्रर्वतनायाः भेदो भवति।

अनया रीत्या भगवता अनुकम्पया ,गुरुणामनुग्रहेण यथामति **काशिकावृत्तेः तृतीयाध्ययस्थ लकारसूत्राणांमध्ययेन** ये विषया अवगताः, तेऽत्र सरलया रीत्या संक्षेपेण च प्रतिपादिताः।

---

[572] अष्टा 3.3.151
[573] चा.व्या.1.3.2
[574] अष्टा 3.3.13
[575] अष्टा 3.2.112
[576] चा.व्या 1.3.121
[577] अष्टा.3.3.173
[578] अष्टा 3.3.161

**उपसंहारः**

**काशिकावृत्तेः तृतीयाध्ययस्थ लकारसूत्राणांमध्ययम्** इति शीर्षकयुक्तः मदीयः शोधप्रबन्ध चर्तुरभिरध्यायैः व्यभज्यते।

**प्रथमोध्याये** वर्तमानो लकाराणां सूत्राणां सृष्टुरुपेण प्रतिपादितम्। वर्तमानोऽर्थे वर्तमानकालो भवति इति सामान्या ज्ञानं छात्रैः ज्ञायन्ते। **वर्त्तमान लट्**[579] इति सूत्रेण वर्तमानकाले सामान्यरुपेण लड लकार भवति। **अपरोक्षे च** [580]**,लट् स्मे**[581] च इत्यादयः भूतानद्यतने परोक्षार्थे धातोः परः लड भवति। अस्मिन्नध्याये विशिष्टतया वर्तमानकालनां सूत्राणां प्रतिपादितं वर्तते .।

**द्वितीयोऽध्याये** भूत लकाराणां सूत्राणां प्रयोगः दृश्यते। अत्र च भूतकालः **सामान्य, अनद्यतनः, परोक्षः** इति भेदेन त्रिधा विभज्यते। **परोक्ष लिट्** [582]इति सूत्रेण परोक्षानद्यतने वर्तमानक्रियावाचकात् धातोः लिट् स्यात्। **अनद्यतने लङ्**[583] इति सूत्रेण अनद्यतनोऽभूतार्थे लङ् लकारो भवति।**लुङ्**[584] सामान्य भूतकाले धातोः लुङ् लकारो भवति। तथैव **पुरि लुङ् चास्मे**[585] इत्यनेन सूत्रेण स्मशब्दो रहित पुराशब्द उपपदे अनद्यतनः भूतकाले धातोः लट्, लुङ् लङ् लिट् लकाराः विकल्पेन भवति। यथा- लट्- **रथेनायं पुरा याति,** लुङ्- **रथेनायं पुराऽयासीत्।** लङ्- **रथेनायं पुराऽयात्,।** लिट्- **रथेनायं पुता ययौ। माङिलुङि**[586] इत्यनेन सूत्रेण माङ् शब्द उपपदे धातोः लुङ्, लिङ्, लोट् प्रत्ययाः भवति। यथा- मा कार्षीत्, मा हर्षीत्।

---

579 अष्टा 3.2 123
580 अष्टा. 3.2.119
581 अष्टा 3.2 118
582 अष्टा3.2.115
583 अष्टा 3.2.11
584 अष्टा 3.2.110
585 अष्टा 3.2.122
586 अष्टा 3.3.175

**तृतीयोऽध्याये** भविष्यतलकाराणां चर्चा कृता ।सामान्यतः भविष्यतकालस्य द्विधा विभाज्यते ।तथा **सामान्य भविष्यतः,अनद्यतनो भविष्यत** च। **अनद्यतने लुट्**[587] इत्यनेन सूत्रेण अनद्यतनार्थे लुड् लकारो भवति। **भविष्यति लृट्**[588] इत्यनेन सूत्रेण सामान्य भविष्यदर्थेवृत्तेधातोर्लृड् भवति। अत्र अन्यनि लृट् लकाराणां सूत्राणां प्रतिपादं क्रियते । यथा- **लृट् शेषे च** [589] अद्यतनभविष्यतकाले व्यामिश्र काले लुट् प्रयोगःन भवति ,अत्र लृट् लकारो भवति। सामान्य भविष्यत्काले लृट् लकारस्य प्रयोगः भवति। **अभिज्ञावचने लृट्** [590] अनेन सत्रेण अभिज्ञावचन अर्थात् स्मृतिशब्द उपपदे अनद्यभूतकाले लृड लकारो भवति।

**चतुर्थोऽध्याये** सामान्य वर्त्तमानकालस्य अबशिष्टांश लकाराणां अत्र प्रयोगः कृतः ।यथा विधिलिङ्, आशीर्लिङ् च। **विधि-सम्प्रश्न-प्रार्थनेषु**[591] इत्यनेन सूत्रेण सम्प्रश्नःसंप्रधारणा,सम्प्रार्थनं याचनं ,इष्टार्थाशंसनं च एषु सर्वत्र लिङ् भवति ।**आशिषि लिङ्लोटौ**[592] इत्यनेन सूत्रेण लिङ् लकारो भवति .। आशीः इत्यस्यार्थः भवति अप्राप्तस्य प्राप्तार्थं आत्मानः इच्छा, न तु आशीर्वादः न्निमित्तम् .।इत्यर्थे लिङ तथा लड लकारस्य प्रयोगः भवति। यथा च लोट्- **चिरं जीवतु भवान्।** लिङ् –**आयुष्यं भूयात्।** अस्मन् अध्याये लिङ् लकारस्यापि व्याख्या कृता। **विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्**[593] इत्यनेन सूत्रेण विधि,निमन्त्रण,आमन्त्रण,अधीष्ट,संप्रश्न तथा प्रार्थनार्थे लिङ् लकारो भवति .।

1. **विधिः**- विधिः इत्यस्यार्थः भवति- कश्चनः व्यक्तिम् आदेशानुसारेण स्वकर्मणिः कार्यं कारयति। उदाहरणम् –**वस्त्रं क्षालयेः।**
2. **मिमन्त्रणः-** श्राद्धादि कार्येषु भोजनार्थं आहानम्। यथा-**इह श्राद्धे भवान् भूञ्जीत।**
3. **आमन्त्रणम्-** य़त्र कार्यस्य विधिपूर्वको न भवति तत्र इच्छानुसारेण कार्यस्य प्रवृतिः भवति तत् कामाचारनुज्ञां **आमन्त्रणम्** इति उत्यते।
4. **अधीष्टः-** सत्करपूर्वकं व्यापारम् **अधीष्टः** इति उत्यते। यथा- **भवान् माणवकम् अध्यापयेत्** ।
5. **प्रार्थना-** पार्थना इत्यस्यार्थः भवति –याचति। अर्थात् **भवान् मे अन्नं दद्यात्** ।विधि ,प्राथना ,इद्यादि प्रर्वतनायाः भेदो भवति।

अनया रीत्या भगवता अनुकम्पया ,गुरुणामनुग्रहेण यथामति **काशिकावृत्तेः तृतीयाध्ययस्थ लकारसूत्राणांमध्ययेन** ये विषया अवगताः, तेऽत्र सरलया रीत्या संक्षेपेण च प्रतिपादिताः।

---

[587] अष्टा 3.3.151
[588] चा.व्या.1.3.2
[589] अष्टा 3.3.13
[590] अष्टा 3.2.112
[591] चा.व्या 1.3.121
[592] अष्टा.3.3.173
[593] अष्टा 3.3.161

# परिशीलितग्रन्थसूची


1. संस्कृत व्याकरण शास्त्र का इतिबहास (श्री युधिष्ठरमिमांसकः) –चौखम्बा पब्लिशर्स, वाराणसी, उ.प्र. 2003
2. वैयाकरणसिद्धान्तकौमुदी ( भट्टोजिदीक्षितः) –चौखम्बा विद्याभवन, वाराणसी, उ.प्र. 2008
3. वैयाकरणभूषणसारः (कौण्डभट्टः) सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, उ.प्र.19988
1. परिभाषेन्दुशेखरः (नागेशभट्टः) चौखम्बा सुरभारती प्रकाशन, वाराणसी, उ.प्र. 1997
2. काशिका ( वामनजयादित्यौ) – चौखम्बा संस्कृत सीरिज आफिस, वाराणसी, उ.प्र. 1972 न्यासव्याख्या (जिनेन्द्रबुद्धिः), पदमञ्जरीव्याख्या (हरदत्तः)
3. अष्टाध्यायी सहजबोध (डाँ.पुष्पा दीक्षित) प्राच्यविद्या-प्रकाशन एवं पुस्तक – विक्रेता, 2011
4. काशिका का समालोचनात्मक अध्ययन(डा.रघुवीर वेदालङ्कार) नाग पब्लिशर्स,दिल्ली,1997
5. काशिका पदमञ्जरी न्यासहिता प्र.भागः(डा.रघुवीर वेदालङ्कार) प्राच्यविधद्याप्रतिष्ठाम्, दिल्ली,1997
6. व्याकरण महाभाष्यम्,प्र.भागः(प्र.खण्डम् )(श्री गुरुप्रसाद शास्त्री) प्रतिभा प्रकाशन्,दिल्ली,1999
7. वाक्यपदीयम्(काशिनाथ वासुदेव शास्त्र) पुणे विश्वविद्यः,पुणे, 1965
8. लघुशब्देन्दुशेखरः चन्द्रकलासहितः प्र.भागः (नरसिंहशास्त्री पेण्डसे) चौखम्बा संस्कृत संस्थान,वाराणसी
9. काशिका प्रकाश व्याख्योपेता प्र.भागः(डाँ.नारायणमिश्रः) चौखम्बा संस्कृत संस्थान,वाराणसी, 1928
10. काशिका भावबोधिनी सहिता तृ.भागः(डाँ.जयशरलाल त्रिपाठी) तारा प्रिटिंग वर्क्स, वाराणसी, 1986
11. वाक्यपदीयम् भर्तृहरिः,सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी,1997
12. व्याकरणसिद्धान्तसुधानिधिः(विश्वेश्वरसूरिः),राजस्थानपत्रिका,जोधपूर,1995
13. वैयाकरणसिद्धान्तकौमुदी (गोविन्दाचार्यः) चौखम्बा सुरभारती प्रकाशन, वाराणसी,2016
14. अष्टाध्यायी सहजबोध(डाँ.पुष्पा दीक्षित) प्रतिभा प्रकाशन्,दिल्ली,2011